समिदाज्यचरुं सद्यो नृसूक्तेन यजेत् सुधीः।
नेत्रोन्मीलनकाले तु सु(सू?)चीपात्रविहीनके॥ ७॥

वस्त्रगोधान्यहीने च यः कुर्याल्लोभमोहतः।
जितन्तास्तोत्रमन्त्रेण जुहुयात् शतमन्वयात्॥ ८॥

---

१. शान्तिहोम इति क।
२. ततं: इति क।

तोरणानां तु सर्वेषां[1] मानहीनेऽधिकेऽपि वा।
अनुक्तविधिसम्पन्ने सति संशोधयेत्तदा॥ ९॥

शान्तिहोमं प्रकुर्वीत ब्राह्मणानाञ्च भोजनम्।
अस्पृश्यस्पर्शने यज्ञे पूजाद्रव्याणि नारद!॥१०॥

हव्यमाज्यं तथा पात्रं मोहाद्वाऽथ प्रमादतः।
सूतकाशौचयुक्तश्च पापरोगयुतस्तथा॥११॥

कृतघ्नो नास्तिको वाऽपि पुनर्द्रव्यं तदाहरेत्।
दाहाप्यायनपूर्वं तत् पश्चाद् विधौ तु योजयेत्॥१२॥

शान्तिहोमं ततः कृत्वा सहस्रमयुतं तु वा।
मूलमन्त्रजपं कुर्याद् ब्राह्मणान् भोजयेद् दश॥१३॥

मृत्पात्राणि परित्यज्य लोहपात्राणि शोधयेत्।
यागशालां च संशोध्य मार्जनोल्लेपनादिभिः॥१४॥

पञ्चगव्येन सास्त्रेण प्रोक्षयेन्मुनिपुङ्गव!।
पूर्णाहुतिविहीने तु कृतमप्यकृतं भवेत्॥१५॥

पुनर्होमं प्रकुर्वीत षोडशाहुतिभिस्तदा।
नृसूक्तेन यजेत् पश्चाज्जपं साहस्रकं तथा॥१६॥

आचार्याय पुरा प्रोक्तां प्रयच्छेद् दक्षिणां मुदा।
लोभेनान्येन केनाऽपि हेतुना न्यूनता भवेत्॥१७॥

शून्यता वा तदाऽऽचार्यो दुःखी स्याद् द्विजपुङ्गव!।
निष्फलं तत्समाख्यातं विघ्नदं तेन हेतुना॥१८॥

प्रणम्य दण्डवद्भूमौ यजमानः स्वयं गुरुम्।
सन्तोषं कारयेत् पश्चाद्वस्त्रहेमाङ्गुलीयकैः॥१९॥

---

१. सवेषां इति क।

दक्षिणां द्विगुणां दद्यात् तेन शान्तिर्भविष्यति।
द्विजभोजनहीने तु दुर्भिक्षं जायते ध्रुवम् ॥२०॥

निष्फलं चैव कर्म स्याद्वैष्णवान् द्विजपुङ्गवान्।
भोजयेद्[1] दक्षिणां दद्यात् क्षमां याचेत याजकः॥२१॥

पूजालोपस्य नित्यस्य प्रायश्चित्तमथः शृणु।
पञ्चकालात्मकं कार्यं पूजनमिति निर्णीतम् ॥२२॥

लोपेनैकेन वा द्वाभ्यां प्रायश्चित्तं चरेत् सुधीः।
द्विगुणं पूजनं कृत्वा परेद्युः निर्जलं गमेत् ॥२३॥

दिनमेकं भवेत् तत्र पूजाहीने तु सर्वथा।
उपोषणं जपञ्चैव सहस्रं मूलमन्त्रकम् ॥२४॥

पञ्चदिनं हि देवात्मा पूजाविहीनको भवेत्।
पञ्चाहं भोजनं त्यक्त्वा पय एव पिबेत्तदा ॥२५॥

स्नपनं देवदेवस्य कृत्वा सम्पूजयेत्ततः।
सप्ताहं लङ्घने पूजां रोगादिनाऽथ केनचित् ॥२६॥

शान्तिहोमं ततः कुर्यात् सप्ताहं कन्दभुग् भवेत्।
मासं यावदपूज्यत्वे प्रतिमायास्तपोनिधे! ॥२७॥

निर्जलं लङ्घनं कुर्यात् पञ्चदिनं तु याजकः।
पश्चात्तं स्नापयेद् देवं विधानेनोत्तमेन च ॥२८॥

अष्टाक्षरसहस्रं तु जुहुयाच्चिन्तयन् हरिम्।
उत्सवं कारयेत् सर्वान् ब्राह्मणान् तोषयेत्तथा ॥२९॥

राष्ट्रापत्तौ तथा कालाद् दुर्भिक्षादिवशान्मुने!।
विघ्नाच्च नास्तिकादीनां वर्षमेकं तु मन्दिरम् ॥३०॥

---

१. षभोजयेद् इति क।

अपूज्यं प्रतिमाऽपूज्या भवेत्तर्हि प्रतिष्ठया।
पुनः संशोधनं कार्यं नयनोन्मीलनं विना॥३१॥

प्रासादमपि पूतेन पञ्चगव्येन वारिणा।
शिखरावधि संशोध्यं पुनः सम्पूजयेत् प्रभुम्॥३२॥

दैनिके पूजिते देवे भवेत् स्पर्शादिदूषणम्।
संशोधनीयं प्रासादं बिम्बं वा तद्धि कथ्यते॥३३॥

प्रासादं भगवत्पीठं गर्भगेहमथाऽपि वा।
रजसा दूषिते स्त्रीणां संशोध्यं तद्ध्रुवं मुने!॥३४॥

गोमयाम्भोभिरालिप्य पर्यग्निकरणं तथा।
पुण्याहवाचनं पञ्चगव्यैः सम्प्रोक्षणं तथा॥३५॥

मार्जार-मूषिका-सर्प-मण्डुकादिकजन्तुभिः।
बिम्बसंस्पर्शने जाते स्नापयेत् परमेश्वरम्॥३६॥

श्वानैश्च गर्दभैरुष्ट्रैः .... शिवा ....।
बिम्बे स्पृष्टे .... स्नापयेत् ...... मार्गतः॥३७॥

जनने मरणे .... प्रासादे ....।
दूषिते...... देव.......... स्नाप ...... मन्दिर.......॥

इति श्रीनारदपञ्चरात्रे सङ्कर्षणसंहितायां प्रायश्चित्तरात्रे
पूजालोपप्रायश्चित्तनिरूपणनामा
चतुर्थोऽध्यायः[1]।

---

१. पुष्पिका क-मातृकायां नास्ति ।

प्रायश्चित्तरात्रे [1]षष्ठोऽध्यायः

नारदः

प्रायश्चित्तानि सर्वाणि श्रुतानि शास्त्रपारग!।
मध्ये मध्ये त्वया प्रोक्तं प्रोक्षणं शान्तिहोम च॥ १॥

ग्रामशान्तिविधिश्चैवं क्रियते केन हेतुना।
कुत्र? केन? कया रीत्या? तत्सर्वं वद विस्तरात्॥ २॥

सङ्कर्षणः

समाहितमनाः सर्वं शृणु त्वं मुनिपुङ्गव!।
सम्प्रोक्षणादिसर्वाणि कर्माणि शुद्धयेऽचिरात्॥ ३॥

बिम्बपीठप्रसादस्य[2] शिखरस्य च भागशः।
सम्पूर्णे खण्डिते वाऽथ पुनर्नूतननिर्मिते॥ ४॥

अस्पृश्यैः स्पर्शने चैवं चण्डालसूतपुल्कसैः।
बिम्बस्य गर्भगेहस्य प्रासादादेश्च[3] नारद!॥ ५॥

महापातकिभिर्गेहे देवस्य समधिष्ठिते।
एकमासाधिकं तत्र प्रोक्षणमाचरेत् सुधीः॥ ६॥

आलये प्राणिनाशे च शवैः स्पृष्टे च मन्दिरे।
बिम्बे वा सत्वरं ब्रह्मन् प्रोक्षणमाचरेत् पुमान्॥ ७॥

---

१. पुष्पिकायां षष्ठाध्यायस्य निर्देशेन पञ्चमोऽध्यायः प्रायश्चित्तविधानविशिष्टो लुप्त इत्यनुमीयते।

२. बिम्बं पीठप्रासादस्य इति क।

३. प्रासादाद्यैश्च इति क।

वल्मीके तु समुत्पन्ने शिथिली.......... दिके।
तत्तद्दोषानुसारेण प्रायश्चित्तमथाचरेत्॥ ८॥

सर्वदोषविनाशार्थं प्रोक्षयेत् पूतवारिणा।
शान्तिकुम्भं विधानेन स्थापयेत् मुनिपुङ्गव!॥ ९॥

न तिथिर्न च नक्षत्रं प्रतीक्ष्यं नैव सामयम्।
सद्यः काले च कर्तव्यं कालक्षेपं न कारयेत्॥१०॥

बीजारोपणपूर्वं तु सर्वकर्म समारभेत्।
मण्डपं कारयेत् पूर्वं चतुर्द्वारसमन्वितम्॥११॥

वितानैस्तोरणैर्युक्तमलङ्कुर्याद् ध्वजादिभिः।
विस्तरायाम[1].......... हस्तमा....... कारयेत्॥१२॥

वृत्तं वा चतुरस्रं वा पद्मकुण्डं विधापयेत्।
अलङ्कारैरलङ्कृत्य दीपान् प्रज्वालयेत्ततः॥१३॥

देवालयं............ बिम्बं वा दूषितं मुने!।
सर्वत्र गोमयाम्भोभिः कुशोदकसमन्वितैः॥१४॥

पञ्चगव्यैश्च संक्षाल्यं पुण्याहोक्तिपुरःसरम्।
निशामुखे प्रवृत्ते तु उद्यते चन्द्रबिम्बके॥१५॥

नित्यपूजावसाने चाङ्कुरानर्पयेन्मुदा[2]।
अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत्॥१६॥

प्रभाते तु समुत्थाय स्नातः स्रग्वी कृताह्निकः।
आचार्यो वैदिकैः सार्धमनुचरैश्च वैष्णवैः॥१७॥

देवगृहं समासाद्य प्रणामं सप्रदक्षिणम्।
कृत्वा देवात्मनः सम्यक् स्नपनमादिशेत्ततः॥१८॥

---

१. विस्ताराम इति क।

२. चाङ्कुरान् समर्पयेन्मुदा इति क।

चित्रभित्तिस्थबिम्बस्य पुरस्ताद् भद्रविष्टरे।
कूर्चे वा दर्पणे स्नानं विधिवत् स्थापितैः घटैः॥१९॥

कृत्वा यागं प्रकुर्वीत देशिको वैदिकैः सह।
प्राङ्मुखे उत्तरे वाऽथ कल्पयेदासनं ततः॥२०॥

प्राणायामं करन्यासं मानसं यागमारभेत्।
प्रणम्य गुरुपङ्क्तिञ्च कुम्भस्थं पूजयेद्धरिम्॥२१॥

मण्डलं शङ्खचक्रादिखचितं पूजयेत्तथा।
संस्कार्याग्निं मखे कुण्डे सहस्रशतसङ्ख्यया॥२२॥

तिलैराज्यैर्यजेद्विष्णुं द्वादशाक्षरविद्यया।
महाकुम्भञ्च सम्पूज्य पूर्णाहुतिं ततो यजेत्॥२३॥

रजनीचूर्णयुक्तेन शाड्वलेन तिलेन च।
दिग्विदिक्षु तथा मध्ये त्विदमुक्त्वा बलिं क्षिपेत्॥२४॥

येषां वै क्रूरसत्त्वानामयं भूभाग आश्रयः।
उत्पातशान्तिहेत्वर्थं बलिं यच्छामि भावतः॥२५॥

गृहीत्वा तं बलिं देवा वासुदेवप्रसादकम्।
ते प्रयच्छन्तु मे तुष्टिं[१] प्रयान्तु परमालयम्॥२६॥

कुण्डस्थं मण्डलस्थञ्च देवं विसृज्य नारद!।
द्वारदेवांस्तथोद्वास्य प्रोक्षणमारभेत् ततः॥२७॥

महाकुम्भं समादाय विन्यसेच्छिष्यमूर्धनि।
शङ्खादिमङ्गलैः घोषैः आगमैर्मन्त्रगीतकैः॥२८॥

सर्वैः परिजनैः सार्धं वेदविद्भिश्च ब्राह्मणैः।
करकास्त्रं समादाय देशिकः स्वकरेण च॥२९॥

---

१. तुष्टि इति क।

अच्छिन्नधारया युक्तं शलाकामात्रया भुवि।
प्रादक्षिण्येन धामान्तः प्रवेश्य मुनिसत्तम!॥३०॥

देवस्य पुरतो न्यस्य प्रार्थनामारभेत् तदा।
त्वमेव जगतः कर्ता संहर्ता मधुसूदन!॥३१॥

पाहि मां पुण्डरीकाक्ष! उत्पातात् करुणानिधे!।
भूमौ स्खलितपादानां भूमिरेवावलम्बनम्॥३२॥

प्रासादबिम्बदोषाणां शोधने त्वं हि देशिकः।
त्वत्प्रसादाद्द्वयं सर्वं समस्तं विश्वमानकम्॥३३॥

गोष्पदमिव भक्तानां भवति त्वं प्रसीद ओम्।
पात्राणि यागद्रव्याणि यद् यद् दोषेण दूषितम्॥३४॥

तत्सर्वं प्रोक्षणीयं वै कुम्भतोयेन नारद!।
द्वारावरणदेवांश्च परिवारांश्च सर्वशः॥३५॥

आत्मानं यजमानञ्च वैष्णवौघञ्च प्रोक्षयेत्।
अभिसि(षि?)च्य बलेः पीठं गरुडं प्रोक्षयेत्तथा॥३६॥

विष्वक्सेनं च सम्पूज्यावशिष्टेन तु प्रोक्षयेत्।
ततः प्रणम्य स्वाचार्यं ब्राह्मणान् वैष्णवान् तथा॥३७॥

गोभूहेमादिकं दद्याद् वित्तवैभवमानतः।
भोजयेद् वैष्णवान् विप्रान् सहस्रं शतमेव वा॥३८॥

शुद्धं स्यान्मन्दिरं गेहं बिम्बञ्च नैव संशयः।
प्रोक्षणं कथितं ब्रह्मन्! सर्वपापहरं शुभम्॥३९॥

ग्रामशान्तिञ्च वक्ष्यामि प्रायश्चित्तान्तरं परम्।
क्षुब्धे राज्ये च भक्तानां शून्ये ग्रामे च दूषिते॥४०॥

वह्निदग्धेऽशनिपाते वात्यासारादिदूषिते[१]।
आधिक्ये[२] नास्तिकानाञ्च चण्डालशबरात्मनाम् ॥४१ ॥

युद्धे ब्रह्मवधे चैवं गवादीनां वधे तथा।
रक्तपातादिना दुष्टे ग्रामे शान्तिं समाचरेत् ॥४२ ॥

शक्यञ्चेन्मृत्तिकां दुष्टां खात्वोद्धृत्य बहिः क्षिपेत्।
शुद्धां सम्पूर्य तद्ग्रामे पञ्चगव्येन शोधयेत् ॥४३ ॥

पर्यग्निकरणञ्चैवं ब्राह्मणैः कारयेत् सुधीः।
सेचयेद् गोमयाम्भोभिः पुण्याहोद्घोषपूर्वकम् ॥४४ ॥

वासयेत् कपिलो नून्(नूः?) सवत्सा दिनपञ्चकम्।
ब्राह्मणान् भोजयेत् तत्र समीकृते भुवि द्विज! ॥४५ ॥

एवं शुद्धिं तु सम्पाद्य यागमण्डपमारभेत्।
देवालयपुरोभागे पूर्वस्यामुत्तरेऽथवा ॥४६ ॥

चतुर्द्वारादिसंयुक्तं वेदिकुण्डसमन्वितम्।
परितोऽष्टौ वा[३]चत्वारः कुण्डा एकोऽथ कल्पयेत् ॥४७ ॥

हव्यद्रव्यादिकं सर्वमेकत्रीकृत्य नारद!।
प्रासादं देशिको गच्छेत् कृतस्नानः कृताह्निकः ॥४८ ॥

देवदेवं तु सम्पूज्य पुरोक्तेनैव कर्मणा।
यागगेहं ततो गच्छेत् सानुचरः सवैदिकः ॥४९ ॥

कल्पयेद् द्वारकलशान् महाकुम्भञ्च दक्षिणे।
करकेण युतं विप्र! शान्तिघटसमन्वितम् ॥५० ॥

करशुद्धिं करन्यासमात्मयागं च कल्पयेत्।
पुण्याहं वाचयेत् पश्चाद् दहनाप्यायनं तथा ॥५१ ॥

---

१. वात्यसारादिदूषिते इति क।
२. आधिकये इति क।
३. व इति क-ख।

कृत्वा सम्प्रोक्ष्य सम्भारान् द्वारार्चनं समारभेत्।
विधिवद् देवमभ्यर्च्य महाकुम्भेऽर्घ्यपूर्वकम् ॥५२॥

.... चतुर्व्यूहं ततः शान्तिघटे द्विज!।
शान्तिं सम्पूजयेत् पुष्टिं तुष्टिञ्चैव विधानतः ॥५३॥

वास्तुदेवं मखे दिक्षु कुमुदार्दीश्च[1] पूजयेत्।
मुख्यकुण्डेऽनलं देवं प्रतिष्ठाप्य[2] विधानतः ॥५४॥

समिद्भिराज्ययुक्ताभिः सप्तभिस्तर्पयेत् क्रमात्।
नृसूक्तेन तिलैराज्यैः प्रत्येकं शतमाहुतीः ॥५५॥

इष्ट्वाऽन्तेऽनलमुद्धृत्य शान्तिहोममनु द्विज!।
दिग्विदिक्षु च कुण्डेषु वासुदेवादिकं यजेत् ॥५६॥

चतुर्वेदमयैः विप्रैः तैस्तैः मन्त्रैरनुक्रमात्।
पावनैः शान्तिसूक्तैश्च वैष्णवैः पाञ्चरात्रिकैः ॥५७॥

एकायनैश्च सन्तर्प्य तिलं साज्यं यजेत्ततः।
शान्तिदेवीं तथा तुष्टिं पुष्टिं वास्तुगणं तथा ॥५८॥

कुमुदादिगणाञ्चैवं मध्यकुण्डे क्रमं यथा।
प्रत्येकमाहुती(तीः?) दद्यादष्टौ विधिविधानतः ॥५९॥

वासुदेवांशरूपाणां देवतानाञ्च नारद!।
इन्द्रचन्द्रचतुर्मुखसूर्यादीनाञ्च संमत! ॥६०॥

पूजनं तर्पणं कार्यं वासुदेवैकमानस!।
ग्रामवास्तुगणांश्चैव नगराश्रितदेवताः ॥६१॥

भूपालाधिष्ठितान् देवान् चैत्यप्रासाददेवताः।
पर्वतद्रुमवेल्याद्यान् उद्यानोपवनांस्तथा ॥६२॥

---

१. कुमुदार्दींच इति क।
२. प्रतिष्ठाय इति क।

अतिथिदेवताः सर्वास्तर्पयेद् घृतधारया।
सम्पाताज्यं तु सङ्गृह्य शान्तिकुम्भे तु सेचयेत् ॥६३॥

महाकुम्भस्थदेवं तु सम्पूज्य देशिकः पुनः।
बलिदानं तु चण्डादीन् प्रयच्छेद् रक्षकांस्तदा ॥६४॥

निशां नीत्वा प्रभातेऽथ देशिको यागमन्दिरे।
द्वारार्चनादिकं कृत्वा महाकुम्भं प्रपूजयेत् ॥६५॥

अर्घ्यपाद्यादिभिर्भोगे(गैः?) सर्वान् सन्तर्प्य ब्राह्मण!।
पूर्णाहुत्यादिकं कृत्वा विसृज्य हृदि भावतः ॥६६॥

महाकुम्भादिकान् सर्वान् वाहयन् मूर्तिपादिभिः।
शान्तिसूक्तस्य पाठेन सह यायात्तु देशिकः ॥६७॥

सम्प्रोक्ष्य देवगेहं प्राग् नृसूक्तमुच्चरन् तदा।
महाकुम्भस्थतोयेन शान्तितोयेन[१] सर्वतः ॥६८॥

ग्रामस्य वीथिकाः सर्वा सम्प्रोक्ष्याश्च प्रयत्नतः।
दूषिताङ्गेषु ग्राम्येषु नृसूक्तमुच्चरन् गुरुः ॥६९॥

प्रोक्षयेत्तु विशेषेण व्यापकं मन्त्रमुच्चरन्।
शोधने सर्वगात्राणामङ्गानाञ्चैव नारद! ॥७०॥

नास्ति व्यापकमन्त्राणां तुल्यमन्यत्तु किञ्चन।
तस्मात् सर्वेषु कालेषु क्रियासु च विधानतः ॥७१॥

कथितेषु विकल्पेन मन्त्रान् तानुच्चरन्मुदा।
बलिं दत्त्वा विशेषेण प्रतिमां पूजयेत्ततः ॥७२॥

प्रणमेत् करुणापूर्णमानन्दस्यन्दनिर्झरम्।
लोकानुग्रहकृद्देवं प्रार्थयेद् भावपूर्वकम् ॥७३॥

---

१. शातितोयेन इति क।

त्वदीयं ग्राम देवेश! रक्षणीयं त्वया सदा।
नास्ति संरक्षकश्चान्यस्त्वद्विना मे गति: प्रभो!॥७४॥
दैविकं भौतिकं वाऽपि मानुष्यं दूषणं हरे!।
ग्रामेऽस्मिन् यत्समायातं शुद्धिं प्रयच्छ पावन!॥७५॥
गोभूस्वर्णादिकं दद्याद् गुरवेऽनुचराय च।
ऋत्विग्भ्यो मूर्तिपेभ्यश्च तोषयेद्वैष्णवान् तथा॥७६॥
तेभ्यश्च दक्षिणां दद्याद् ग्रामसौख्यप्रदां द्विज!।
विधिर्ग्रामस्य शान्त्याख्यो विस्तरात् कथितो मुने!॥७७॥
शान्तिहोमं तु कर्तव्यं विधिं तस्य..............
पुरोक्तेन विधान...... सम्पू..... वह्नि........
नारसिंह विशे..... शा(शां?)तिसूक्तं समुच्चरन्।
....[1]

इति श्री नारदपञ्चरात्रे सङ्कर्षणसंहितायां प्रायश्चित्तरात्रे सम्प्रोक्षणग्रामशान्त्यादिविधिनिरूपणनामा षष्ठोऽध्याय:[2]।

संवत् १७३३ वर्षे शके १५९८ प्रवर्तमाने तृतीये राजशके वैशा......
गागाभट्टात्मजेन श्री...(न) ग्रंथां.... तरं राय..... ने लिखावितम्॥
राधाकृष्ण: प्रसन्नो अस्तु॥ गोविंदार्पणमस्तु॥
ग्रन्थाक्षरानुगुण्येन लिखितं सावधानत:।
यावत् शुद्धमशुद्धं वा मम दोषो न कश्चन[3]॥
॥ श्रीरस्तु शुभमस्तु॥

इति सङ्कर्षणसंहिता समाप्ता।

१. अध्यायस्य अन्तिमो भागो लुप्त:।
२. पुष्पिका क-मातृकायां नास्ति।
३. श्लोकोऽयं क-मातृकायां ग्रन्थलिप्यां नागराक्षरेषु च लिखित: प्राप्यते।

परिशिष्टानि

१	शुद्धाशुद्धसृष्टिसर्ग:	–
२	वासुदेवमण्डलम्	–
३	चतुर्व्यूहस्य द्वादशव्यूहानाञ्चायुधानि वर्णभेदश्च	२८९
४	विभवदेव-देवी-स्थानादिवर्णनम्	२९०-२९१
५	मातृकाचक्रम्	२९२
६	परस्नपनस्य कलशव्यवस्था द्रव्याणि च	२९३
७	मुख्यानि दिशाभेदेन निरूपितानि दश तीर्थानि	२९४-२९५
८	स्वयंव्यक्तानि क्षेत्राणि	२९६-२९७
९	श्लोकार्धानुक्रमणी	२९८-३६८
	-ज्ञानरात्रम्	२९८-३१३
	-मन्त्ररात्रम्	३१३-३२९
	-आचाररात्रम्	३३०-३४४
	-अर्चनारात्रम्	३४५-३६१
	-प्रायश्चित्तरात्रम्	३६२-३६८
१०	विशिष्टशब्दसूची (Index)	३६९-३८३

परिशिष्ट-१

शुद्धाशुद्धसृष्टिसर्गः, ज्ञानरात्रे सप्तमोऽध्यायः



परिशिष्ट-२

वासुदेवमण्डलम्, आचाररात्रे चतुर्थोऽध्यायः

क्रमाङ्कः
१. वा
२. के
३. ना
४. मा

क्रमाङ्कः
१. स
२. गो
३. वि
४. म

क्रमाङ्कः
१. प्र
२. त्रि
३. वा
४. श्री

क्रमाङ्कः
१. अ
२. प
३. ह
४. दा

१. ग्रन्थ

परिशिष्ट-३

चतुर्व्यूहस्य द्वादशव्यूहानाञ्चायुधानि वर्णभेदश्च

ज्ञानरात्रम्, ३/३४-६१, ८५-१०७.

वासुदेवेन सह चतुर्व्यूहः, श्वेतवर्णः

क्रमाङ्कः	नाम	वा.मु.हस्तः	द.मु.हस्तः	वा.गौ.हस्तः	द.गौ.हस्तः
१.	वासुदेवः	शङ्खः	अभयः	गदा	चक्रम्
२.	केशवः	गदा	पद्मम्	चक्रम्	शङ्खः
३.	नारायणः	गदा	पद्मम्	शङ्खः	चक्रम्
४.	माधवः	शङ्खः	गदा	पद्मम्	चक्रम्

सङ्कर्षणेन सह चतुर्व्यूहः, रक्तवर्णः

क्रमाङ्कः	नाम	वा.मु.हस्तः	द.मु.हस्तः	वा.गौ.हस्तः	द.गौ.हस्तः
१.	सङ्कर्षणः	शङ्खः	अभयः	मुसलम्	सीरम्
२.	गोविन्दः	पद्मम्	गदा	चक्रम्	शङ्खः
३.	विष्णुः	शङ्खः	पद्मम्	चक्रम्	गदा
४.	मधुसूदनः	पद्मम्	शङ्खः	गदा	चक्रम्

प्रद्युम्नेन सह चतुर्व्यूहः, पीतवर्णः

क्रमाङ्कः	नाम	वा.मु.हस्तः	द.मु.हस्तः	वा.गौ.हस्तः	द.गौ.हस्तः
१.	प्रद्युम्नः	शङ्खः	अभयः	शार्ङ्गम्	बाणपञ्चकम्
२.	त्रिविक्रमः	चक्रम्	गदा	शङ्खः	पद्मम्
३.	वामनः	गदा	चक्रम्	पद्मम्	शङ्खः
४.	श्रीधरः	गदा	चक्रम्	शङ्खः	पद्मम्

अनिरुद्धेन सह चतुर्व्यूहः, कृष्णवर्णः

क्रमाङ्कः	नाम	वा.मु.हस्तः	द.मु.हस्तः	वा.गौ.हस्तः	द.गौ.हस्तः
१.	अनिरुद्धः	शङ्खः	अभयः	खेटकम्	खड्गः
२.	पद्मनाभः	पद्मम्	चक्रम्	शङ्खः	गदा
३.	हृषीकेशः[१]	चक्रम्	पद्मम्	गदा	शङ्खः
४.	दामोदरः	गदा	शङ्खः	चक्रम्	पद्मम्

---

१. ग्रन्थे 'हृषीकेशः' इति नाम न दृश्यते, आयुधक्रमस्तु विद्यते।

परिशिष्ट-४

विभवदेव-देवी-स्थानादिवर्णनम्

ज्ञानरात्रे चतुर्थोऽध्यायः

क्रमाङ्क	देव	देवी	स्थानम्	वर्णन-श्लोकः
१	पद्मनाभः	धीः	क्षीरोदधिः	४/२३-२७
२	ध्रुवः	तारा	उत्तरध्रुवः,दक्षिणध्रुवः	४/२८-३०
३	अनन्तः	वारुणी	पातालम्	४/३०-३३
४	शक्त्यात्मा	शक्तिः	पृथिवी	४/३४-४०
५	मधुसूदनः	पद्मा	धरणी	४/४०-४२
६	विद्याधिदेवः	विद्या	वाराणसी	४/४३-४५
७	कपिलः	सङ्ख्या	पातालम्/समुद्रापयानः	४/४६-४७
८	विश्वेश्वरः	विश्वा	श्वेतद्वीपः, कुरुक्षेत्रम्	-
			हिमाचलः,वेदिकातटम्	४/४८-५५
९	हंसः	खगा	श्वेतद्वीपः	४/५५-५७
१०	क्रोडात्मा	?	कोकामुखम्	४/५८-६१
११	वडवावक्त्रः	गौः	वडवामुखम्	४/६२-६४
१२	धर्मात्मा	मूर्तिः	धर्मारण्यम्,हिमाचलः	४/६५-६७
१३	वागीश्वरः	वागीश्वरी	कृष्णाश्वक्षेत्रम्	४/६८-७१
१४	एकार्णवशायी	निद्रा, प्रीति,	-	
		विद्या, लक्ष्मी	एकार्णवः	४/७२-७४
१५	कूर्मः	धरणी	लवणोदधिः	४/७४-७६
१६	नृवराहः	छाया	सूकरक्षेत्रम्	४/७७-७९
१७	नृहरिः(नृसिंहः)	नारसिंही	?	४/७९-८१
१८	अमृताहरणः	?	समुद्रमन्थनस्थलम्	४/८२-८४
१९	श्रीपतिः	श्रीः	समुद्रमन्थनस्थलम्	४/८५-८७

२०	कान्तात्मा	?	समुद्रमन्थनस्थलम्	४/८८-९०
२१	राहुजित्	विश्वकामा	समुद्रमन्थनस्थलम्	४/९१-९४
२२	कालनेमिघ्नः	मा	-	४/९५-९८
२३	पारिजातहरः	सत्या	सूकरक्षेत्रम्	४/९८-१०२
२४	लोकनाथः	कान्तिः	मगधामण्डलम्	५/२-४
२५	दत्तात्रेयः	सरोरुहा	वस्त्रापथम्	५/५-८
२६	न्यग्रोधशयनः	-	प्रयागक्षेत्रम्	५/८-११
२७	मत्स्यात्मा	-	नौबन्धगिरिः	५/११-१३
२८	वामनः	खर्वा	हिमाचलः,वामनस्थलम्	५/१४-१७
२९	त्रिविक्रमः	-	गङ्गामध्यदेशः, कुरुक्षेत्रम्, यमुनातटम्	५/१७-२४
३०	नरः	नरसम्भवा	बदरीवनम्,गोवर्धनगिरिः सालग्रामम्,गवांस्थानम्	५/२४-२८
३१	नारायणः	नारायणी	सालग्रामम्,पिण्डारकम्	५/२८-३०
३२	हरिः	हरिप्रीतिः	सालग्रामम्,पिण्डारकम्	५/३०-३१
३३	कृष्णः	गान्धारी	सालग्रामम्,पिण्डारकम्	५/३२-३५
३४	परशुरामः	काश्यपी	महेन्द्रपर्वतः	५/३६-३८
३५	दाशरथिः रामः	वैदेही	चित्रकूटम्,अवधः	५/३८-४०
३६	वेदविद्	विद्या	बदरीवनम्	५/४१-४४
३७	कल्किः	पद्मिनी	विपाशातटम्	५/४५-४९
३८	पातालशायी	लक्ष्मी, चिन्ता, निद्रा, तुष्टिः	पातालम्	५/४९-५२

परिशिष्ट-५

मातृकाचक्रम्

मन्त्रराात्रे द्वितीयोऽध्यायः



परिशिष्ट-६

परस्नपनस्य कलशव्यवस्था द्रव्याणि च

अर्चनारात्रम् , ७/६२-७९

पूर्व

उत्तर

६ वनत्रेतादि-अग्निभस्म	५ गोमयरसः	४ नगादिद्वादश-मृदः	३ आचमनीयम्	२ अर्घ्यद्रव्यम्	१ पाद्यद्रव्यम्
७ कुशोदकान्वितं पञ्चगव्यम्	८ सघृतः तैलकुम्भः	९ चमसीवारि	१० कषायोदकम्	११ त्रिफलोदकम्	१२ वचादिद्रव्याणि
१८ आज्यम्	१७ क्षीरम्	१६ दधि	१५ गजपिप्पल्या-दिकम्	१४ यष्ट्यादिकम्	१३ महानीलादि-द्रव्याणि
१९ मधु	२० इक्षुरसः	२१ पद्ममूलानि	२२ सक्षीरद्रुमाणां पत्रपुष्पमञ्जरी-फलानि	२३ जात्यादिकम्	२४ कौसुमरसः
३० बाह्लीकादि	२९ आरण्यौषधयः	२८ ग्राम्यौषधयः	२७ सिद्धार्थकादिकं	२६ सास्यं शाल्यङ्कुर दर्भदूर्वादिकञ्च	२५ रोचनादिकम्
३१ धातवः सुवर्णाद्याः	३२ रत्नवारि	३३ विद्रुमजालादि मुक्ताफलानि	३४ तीर्थोदकम्	३५ सुशीताम्भः शुद्धोदकम्	३६ सुगन्धि पुष्पोदकम्

दक्षिण

पश्चिम

स्नपनकाले कलशाधिष्ठितदेवता-मन्त्राणां व्यवस्था

प्रथमे कुम्भे पद्मनाभध्रुवयोः स्थापनं तदनन्तरञ्च पातालशायिपर्यन्तानां विभवानां स्थापनम्। तत्तद्देवतामन्त्रस्तत्तत्कलशे स्नपनकाले पठनीयाः पुरुषसूक्तस्य, परमन्त्रस्य वा पाठः सततं कार्यः।

अर्चनारात्रम्,७/८३ तथा ८/२५,२६.

परिशिष्ट-७

मुख्यानि दश तीर्थक्षेत्राणि

अर्चनारात्रे चतुर्थोऽध्यायः

मुख्यानि दिशाभेदेन निरूपितानि दश तीर्थानि

अर्चनारात्रे चतुर्थोऽध्यायः

दिशा	स्थानम्	स्थानविशेषनाम	मूर्तिः
१. अधस्तात्	पातालद्वारे (गङ्गासागरसङ्गमे)	कपिलाश्रमः	कपिलः
२. आग्नेय्यां	शङ्खक्षेत्रम्	श्रीपुरुषोत्तमक्षेत्रम्	जगन्नाथः
३. दक्षिणे	तोताद्रिक्षेत्रम्	–	वासुदेवः (खगासनः)
४. नैर्ऋत्ये	नारायणाद्रिः	यादवाद्रिः (मेलुकोटे)	नारायणस्वामी
५. पश्चिमे	द्वारका	कुशस्थली	श्रीकृष्णः
६. वायव्ये	पुष्करक्षेत्रम्	–	शेषशायी भगवान्
७. उत्तरे	बदरिक्षेत्रम्	–	नरनारायणौ
८. ईशाने	सालग्रामक्षेत्रम्	राजेन्द्राख्यं वनम्	जनार्दनः
९. पूर्वे	नवलक्षाभिधं क्षेत्रम्	–	वासुदेवः
१०.ऊर्ध्वं	भूवैकुण्ठं	श्रीरङ्गक्षेत्रम्	श्रीरङ्गनाथः

परिशिष्ट-८

स्वयंव्यक्तानि क्षेत्राणि

अर्चनारात्रे चतुर्थोऽध्यायः

पूर्वदिशि

क्रमाङ्कः	स्थानम्	देवः
१	हेमशैलः	हेमोत्तमाङ्गदृक्
२	मन्दरगिरिः	मधुसूदनः
३	लवणोदधिः	कूर्मः
४	गङ्गासागररसङ्गमः	यज्ञभुक्
५	मगधामण्डलः	लोकनाथः
६	प्राग्ज्योतिष्पुरः	विश्वेश्वरः

दक्षिणदिशि

क्रमाङ्कः	स्थानम्	देवः
१	वेङ्कटक्षेत्रम्	श्रीनिवासः
२	नारायणाचलः	नारायणस्वामी
३	सह्याद्रिः	वामनः
४	दक्षिणदिशा (समुद्रसमीपे)	पद्मनाभः
५	महेन्द्रपर्वतः	परशुरामः
६	हस्तिपर्वतः	देवदेवेशः
७	सातत्रनाभिधः	जनार्दनः
८	शङ्कराख्यभूः	ज्ञानमूर्तिर्जगन्नाथः
९	मतङ्गाश्रमः	दाशरथिः रामः
१०	मृगस्थलम्	अभयहस्तः
११	पाण्डुरङ्गपुरम्	पाण्डुरङ्गः

पश्चिमदिशि

क्रमाङ्कः	स्थानम्	देवः
१	भूभागपदम् (नाभसाह्वयः)	गोविन्दः

२	नर्मदातटम्	श्रीधरः
३	रैवतकपर्वतः	दामोदरः
४	कृष्णाश्वः	अश्वशिराः (हयग्रीवः)
५	धर्मारण्यम्	धर्ममूर्तिः
६	पिण्डारकक्षेत्रम् (द्वारका)	कृष्णः
७	दण्डकारण्यम्	शार्ङ्गपाणिः
८	अर्बुदपर्वतः	दण्डपाणिः
९	प्रभासक्षेत्रम्	विष्णुः

उत्तरदिशि

क्रमाङ्कः	**स्थानम्**	**देवः**
१	कुरुक्षेत्रम्	केशवः केशिहा
२	वृन्दावनम्	गोवर्धनः
३	यमुनाजलम्	त्रिविक्रमः
४	ध्वजाख्यं कुब्जाम्रकक्षेत्रम्	हृषीकेशः
५	गङ्गातटम्	बिन्दुमाधवः
६	कृतशौचम्	नरसिंहः
७	साकेतम्	दाशरथिरामः
८	मायापुरी	नीलकण्ठः
९	प्रयागः	न्यग्रोधशायी
१०	हिमाचलम्	मधुकैटभमाथी
११	नैमिषारण्यम्	यज्ञभुक्
१२	सूकरक्षेत्रम्	गरुडवाहनः
१३	शिपिविष्टात्मकम्	शिपिविष्टावृतः
१४	मणिबन्धः	ब्रह्म
१५	चक्रधरम्	चक्रपाणिः
१६	मन्दाकिनीतटम्	जगन्नाथस्वामी
१७	कोकामुखम्	वाराहः

परिशिष्ट-९

श्लोकार्धानुक्रमणी

ज्ञानरात्रम्

अंशभूतास्तथा ब्रह्मन्!	४/२२
अंशेन कलया वाऽपि	५/५४
अगम्यं लौकिकैर्बाह्यैः	२/३७
अग्निश्च मुखतो जातः	६/७०
अग्न्यादयश्च सञ्जाता	६/६९
अग्रगे चक्रराड् वामे	३/१०४
अग्रतो वामपाणौ च	३/९७
अग्राह्यमव्यक्तमवर्ण	२/६६
अङ्गिरा मुखतोऽक्ष्णो	७/४४
अचित्सर्गो यथा ज्ञातः	७/३
अज्ञानात् तु तदासक्ति	८/२०
अज्ञोऽपि नु त्वदीयो	२/८
अञ्जनाद्रिप्रतीकाशः	३/६०
अण्डं ददर्श लोकेश	७/२६
अण्वादिसूक्ष्मरूपो	६/३९
अतले वितले चैव	७/७६
अतः सर्वगतत्वाद्वै	२/३४
अतसीपुष्पसङ्काशः	४/७७
अतसीपुष्पसङ्काशमि	३/१०६
अतसीपुष्पसङ्काशव	३/४५
अतीन्द्रियैः निरातङ्कैर	१/३३
अतोऽनिरुद्धमूर्तीनां	३/१०२
अथ दाशरथी रामो	५/३८
अथ नारायणो	१/११
अथ नारायणो देवो	५/२८
अथ प्रत्येकतेजोंशा	३/८३
अथ प्रद्युम्नमुख्या	३/९६
अथापश्यत् परं देवं	१/३५
अद्वन्द्वमजरं शान्त	२/६४
अधस्तादासनस्या	७/२२
अधिदैवत्यभावेन	७/५८
अधिदैवत्यरूपेण	७/६४
अधिभूतं तु बोद्ध	७/५८
अधिभूतं मतिर्ज्ञेया	७/६६
अधिभूतमधिदैवम	६/७२
अधिभूतमपानाद्या	७/६२
अध्यात्मं द्विज!	७/५७
अध्यात्मं परमं ब्रह्म	७/५४
अध्यात्मं तु	७/६२
अध्यात्मं तु	७/६४
अध्यात्मादित्रयं	७/६९
अध्यात्मादित्रयञ्चैव	७/४
अध्यात्माऽधिभूतं	७/५३
अनन्तभोगशय्यायां	१/२५
अनन्तरुद्रब्रह्माद्यैश्चि	२/४४
अनन्तशक्तये नेत्रे	१/९
अनन्तशयनारूढः	५/५१
अनन्ताख्यश्च भगवान्	४/३०
अनलः काष्ठमग्नो	२/५९
अनिमीलितनेत्रात्मा	५/१३
अनिरुद्धस्य मायैषा	३/६७
अनिरुद्धात्मकं सृष्टौ	३/१७
अनिरुद्धात्मको देवः	३/७
अनिरुद्धात्मना देवः	६/६१
अनुज्ञातः समुत्थाय	१/४०
अनुवृत्त्या परस्यात्र	३/८१
अन्तःस्थितं परात्मानं	७/२३
अन्तरे तेऽस्ति जिज्ञा	२/९
अन्तर्निविष्टसद्भावः	५/२५
अन्तर्यमनशक्त्या तत्	२/४०
अन्तिमे सप्तमे लोके	७/७८
अपरेण दधानञ्च दक्षि	३/३६

ज्ञानरात्रम्

अपसव्येऽग्रगे शब्दं	३/१०५	आनन्दामृतसम्पूर्णमुख	४/९०
अपारणीयं तमसः	२/६४	आनन्दार्णवमग्नोऽस्मि	२/६१
अप्रहर्षमनानन्दम	२/६५	आयुष्यं दीर्घकालञ्च	१/२७
अब्जनाले चचाला	७/२२	आरक्ताधररक्ता च	३/५७
अयं हि परमेशस्य	२/३२	आविरासीज्जगत्स्रष्टु	६/७
अयःपिण्डे यथा	२/२२	आवृणोति तमः सर्गो	६/१२
अयने ऋतवो मासाः	६/३७	आसीत् सौम्य! तमो	६/४
अवतीर्णो विमोहाय	५/९	आसीदिदं जगत् सर्वं	३/२६
अवधे चैव भूभागे	५/४०	आहङ्कारिकवर्गोऽयं	६/५८
अविकाराय शुद्धाय	६/१	आह्लादजननीगङ्गा	५/१८
अविच्छिन्ना च देशेषु	१/२६	इच्छा प्रीतिः रतिश्चैव	३/१०८
अविज्ञेयं तदैवाऽऽसी	६/६	इच्छारूपधरः सौम्यः	४/३५
अविज्ञेयान् वाऽपि	२/१०	इच्छाशक्तेः परत्वेन	७/६३
अविद्याज्ञानतमसो	५/९	इत्थं ज्ञानं मया ब्रह्मन्	८/३१
अविद्यावेष्टितत्वाच्च	७/१०	इत्थं प्राणादिभिः ख्यातं	६/३२
अव्यक्तं त्रिगुणं सूक्ष्म	६/५	इत्थं सृष्टिः समाख्याता	७/८०
अव्यक्ताय च व्यक्ताय	६/२	इत्याख्यात इत्युक्तो	२/५४
अशुद्धसृष्टिरूपेण माहा	५/५६	इत्युक्त्वा करुणानेत्रो	१/२७
अष्टबाहुवि(विं?)शालाक्षः	४/४२	इदानीं श्रोतुमिच्छामि	४/२
असङ्गशक्त्या भगवान्	५/३७	इन्द्रा भवन्ति मनवो	८/८
असुराणां विमोहाय	४/२१	इन्द्रियाणामधिदेवाः	६/४८
अस्मिन् न केवलो	१/५९	इरावती सुधा दीक्षा	७/३९
अस्मीति प्रत्ययं लब्ध्वा	७/२७	इ(ई?)षदुत्तानशायी सो	५/१०
अहं परागतिस्तत्र	१/५३	इ(ई?)षल्लब्धरसानां	५/६
अहं सङ्कर्षणाख्येन	३/४४	ईशितव्यं जगत्सर्वम	६/८
अहङ्कारस्त्रिधा जातः	६/४१	ईशेशितव्यः सम्बन्ध	६/८
अहो अद्भुतमेतन्मे	७/४६	उग्ररेता भवः कालो	७/३८
आज्ञाप्रतीक्षकैनै(णै?)वं	४/३८	उच्चैःस्वरं स्तुवन्तं	१/४०
आत्मनोऽन्तः प्रतिष्ठान	३/१३	उज्ज्वलो गोयुतो	४/६४
आत्मन्यात्मानमावेश्य	७/२५	उत्सङ्गात् त्वां ससर्जा	७/४३
आत्मन्येव यः सन्तुष्ट	७/७०	उदयादित्यवर्णाभो	५/३६
आत्यन्तिकाभिधो ज्ञा	८/२	उदानः कण्ठदेशस्थः	६/२९
आदित्यायुतसन्दीप्तः	५/१५	उदितं चातुरात्म्यस्य	७/६०
आदिवत् पाणियुगल	३/६१	उपाविवेश देवस्य	१/१०
आदिष्टो विष्णुरूपो	६/२८	उपासकानां भक्तानां	३/५१
आधारं(रो?) भुवना	५/५०	उपासकानुग्रहार्थं चातुरा	३/३१
आधाराधेयभावेन आ	३/८	उ(ऊ?)र्ध्वं तिर्यगधो	२/३५
आनन्दं तत्परिग्राह्यं	८/२९	ऋते ज्ञानान्न मुक्तिः	२/६०
आनन्दं यत्र पर्यायो	२/७१	ऋषयः सिद्धगान्धर्वाः	१/१८

ज्ञानरात्रम्

ऋषीणां भूरिवीर्याणा ७/४५
ऋषीणाञ्च नरादि(दी?) १/४७
एकदा नारदो विद्वान् १/१
एकमेव परं ब्रह्म २/२५
एकमेवायनं पुंसामेक २/४
एकमेवायनं मोक्षे २/५
एकलो न सुखं लेभे ७/२१
एकवक्त्रं चतुर्हस्तं स्वा ३/३०
एकवक्त्रश्चतुर्बाहुः ३/५३
एकवक्त्रा द्विनेत्रा च ३/४९
एकस्मिन्वासरे तस्य ८/७
ए(ऐ?)कात्म्यं जगता २/५५
एकान्तधर्मस्थित्यर्थम १/५०
एकार्णवान्तःशायी च ४/१५
एकैकं भगवद्रूपं मुख्य ३/७१
एकोऽप्यनेकरूपोऽसौ २/४०
ए(ऐ?)क्यं तस्य चिद ३/१२
एतत् सर्वत्र विज्ञेयं तत्त्व ७/५६
एतदेव हि ज्ञानस्य फलं ८/२९
एतदेवानुजानीहि देवस्य ६/७३
एतावता लक्षणेन व्यक्ती ३/६८
एभिरेव गुणैर्माया प्रसूते ६/१३
एभिरेवानिरुद्धाख्यः ६/३०
एवं पश्चिमहस्ताभ्यां ३/९३
एवं विचारयतस्तस्य ७/४७
एवं सर्वत्रगो विष्णुः २/५९
एवं हि केशवो धत्ते ३/८३
एवमैक्यमनैक्यञ्च पर ३/२३
एषां लोकनिवासिना ७/७९
ऐक्याख्यो व्यपदे ३/१७
ऐश्वर्येण च वीर्येण ३/५५
कञ्जं मुख्यकरे वामे ३/९१
कञ्जमग्रकरे वामे ३/१०२
कट्यादिभिरधः सप्त ६/६४
कट्यामतलमुत्पन्नमूरु ६/६७
कण्ठकूपधरारूढं २/५२
कति भेदास्तथा तस्य ३/५
कथं ज्ञेयश्च भगवान् २/६
कथं प्रसन्नता तस्य २/७
कथं वा स्यादनाख्यात २/२८
कथमेकायनो धर्मो २/५
कथय मां विशेषेण २/७
कथितं विस्तरात् सर्वं ८/३२
कनकोज्ज्वलचक्षुष्को ४/६४
कन्दमाले मनोगम्ये ५/१७
कन्दमूलफलैः पत्रैः ४/७०
कपिलस्तत्त्वसङ्ख्यातः ४/४६
कमलं चाक्षसूत्रञ्च ४/६८
कमलगर्भवर्णाभो ४/८५
कमलोत्पलसंकीर्णैः १/३२
करुणाविष्टनेत्राब्जः ५/३
करोति सेचनं दोषद ४/६३
कर्तृत्वं कारणत्वञ्च ६/४३
कर्मवृक्षः सुविस्तारो ४/१००
कर्मिणां फलदानाय ४/१०
कर्मेन्द्रियाण्यधिष्ठाय ६/५०
कलाश्च विनाड्यश्च ६/३८
कल्पावसानसमये ५/१२
कल्याणादिगुणैर्युक्तं २/२१
क्वचिद् विलीय वैश्व ४/१२
कषायरहिता नित्यं २/७६
कान्तात्मा मोहिनीरूपो ४/८८
कान्तारूपधरश्चैव सुधा ४/९४
कान्तियुतोऽसुरांशानां ५/४
कारुण्याद्याति लोके २/३८
कार्यकारणभावस्तु ३/१
कार्यकारणभावोऽयं २/२४
कार्यकारणभावोऽयं ३/८
कार्यकारणरूपत्वाद् ३/३
कार्यञ्चेत् तत्कथं ३/२
कार्यञ्चेत्तदनित्यं स्य ३/७
कालः सर्वेषु जागर्ति ६/३४
कालः सृजति भूतानि ६/३३
कालनेमिघ्नरूपेण ४/९५
कालस्तत्र न सामर्थ्य २/६७
कालस्यापि हि कालो २/४३
कालाग्निरपि तत्स्थाने २/६८

ज्ञानरात्रम्

कालात्मदैवतं विद्धि ७/६७
कालेन महताऽश्रावीत् ७/२४
कालो बहुविधोऽनन्तो ३/३६
कालोऽयं परमाण्वादि: ३/३५
कालो विभजते सर्वं ६/३४
काशते चन्द्रमा: पूर्ण: ३/१८
काश्यपीहृदयव्यापी ५/३८
काषायधारिणो नित्यं ५/३४
किं वा देवाप्सर:सिद्ध ७/८
किन्नराणाञ्च दैत्यानां १/४८
किमिच्छन् आगतो १/४१
किरीटमुकुटै: रम्यैर्हार ३/७५
कीदृशं तत् कथं प्राप्यं २/६२
कुन्देन्दुकान्तिधवल: ४/५६
कुमारो रुरुदे सद्यो ७/३५
कुलिशं क्षुरिका(कां?) ५/२१
कूर्माख्यो भगवान् ४/७४
कृत्तो वनस्पतिरिव १/३९
कृत्वैकान्तिक: स्नेह: ८/१४
कृष्ण इन्दीवरश्याम ५/३२
कृष्णाजिनोत्तरीयाश्च ५/३४
केचित् मध्ये प्रयत्नाद्धि १/१६
केयूराभरणोपेता पीत ३/६५
केशवादिभि: सार्धं ३/१०९
केशवाद्यं त्रयं चान्यद् ३/८३
केशवाद्या: चतुर्विंश: २/२६
कोकामुखे स्थितो ४/६०
कोऽहं? कस्मात्? ७/२१
क्रियाज्ञानविभेदेन ६/४९
क्रियामार्गेण तेनैव १/५३
क्रियाशक्तेस्तु दैवत्यं ७/६६
क्रुद्ध: पुत्रान् नियन्तुं ७/३४
क्रोडात्मा वडवावक्त्रो ४/१५
क्रोधात् तामसवेगात्मा ७/३५
क्रोधात्मिका प्रजा तस्य ७/३९
क्षीणे पुण्ये पतन्त्येव १/१७
क्षीरोदकक्षितिक्षेत्रे पद्म ४/४२
क्षीरोदधेरुत्तरत: मेरोश्च १/२९
क्षीरोदधौ स्थितो विप्र! ४/२७
क्षुब्धाया: प्रकृतेस्तस्या ६/१०
खगाख्या महिषी यस्य ४/५७
खड्गचक्रगदादण्डबाणा ५/२०
खर्वाभर्ता विवैतस्ते ५/१६
खे गतेनाङ्घ्रिदण्डेन ५/१९
गणयन्नक्षसूत्रीयान् ५/२६
गदाऽग्रवामहस्ते तु ३/९८
गदा पश्चिमत: सव्ये ३/९५
गदितं तत् सदेवाऽस्ति २/५५
गान्धार्याविष्टचेतस्को ५/३२
गुणद्वयद्वयेनैव भेद ३/७१
गुणषट्कयुतं दिव्यं ७/५९
गुह्यं यद् वासुदेवोक्तं २/३
गोविन्दस्य प्रभोर्विप्र! ३/९२
ग्रहनक्षत्रराशीनां ६/३६
ग्राम्यारण्यैश्चरुबीजै: ४/७०
ग्राह्यं ग्राहकक्षेत्राणि ८/१९
ग्रीवायां जनलोकश्च ६/६६
घोणाग्रेणाऽऽहरन्तश्च ४/६३
घ्राणग्राह्या मनुष्याणां ६/५७
चक्रं कञ्जं गदां बाण ४/१६
चक्रं द्वितीयहस्ते वै ४/३२
चक्रमग्रेऽपसव्याख्ये ३/१००
चक्राद्यायुधवृन्देन मूर्तेन ५/५१
चक्षुर्भ्यां रविरुत्पन्नश्च ६/७१
चतुरभ्यधिकैर्दिव्यैश्चत्व ४/४९
चतुर्थं पर्व इत्युक्तं ६/७४
चतुर्भुजं सौम्य ३/३४
चतुर्भुजा सौम्यवक्त्रा ३/६५
चतुर्भुजै: किशोरैश्च १/३४
चतुश्चक्रे नवद्वारे २/५१
चतुष्कमवशिष्टं यद् ३/७२
चतुस्तत्त्वमये कञ्जे ४/२४
चन्द्रसूर्यादयस्तत्र न २/६७
चन्द्रार्कमण्डले पूर्णे ४/५३
चरित्रं कीर्तितव्यं तत् ६/७३
चलति देव इत्युक्ते ३/१२
चातुरात्म्यं ततो जातं ३/३३
चातुरात्म्यं द्वितीयं तु ३/९६

ज्ञानरात्रम्

चातुर्विध्यं व्यूहे ज्ञेयं	४/४	ज्वलत्परशुधृग् रामो	४/१९
चित्तं बुद्धिश्च देवेऽस्मि	२/५०	तज्जले शयनं चक्रेऽनि	६/६२
चित्सृष्टिरेवमाख्याता	७/५०	तज्ज्ञानं पाञ्चरात्राख्यं	१/४९
चिदचित्सृष्टिजिज्ञासां	७/११	ततः प्रकटिता देवी	३/४८
चिदचिद्रूपकार्यस्य	२/२९	ततः प्रहृष्टवदनः	१/५
चिदचिद्वस्तुवर्गस्य	२/२४	ततस्तदूर्ध्वमुखं स्यात्	२/५२
चिदन्वयेऽपि सर्गे	७/१३	ततो बाह्यान्तराणि	२/५३
चिदात्मैकस्तु तद्भिन्नो	८/२१	ततो माया समुद्भूता	३/६३
चिन्तनीयं परंब्रह्म	८/२६	ततो विस्मयमापन्नो	१/२८
छत्रं तु वामहस्तेऽस्य	५/१४	तत्तत्कार्यकरत्वेन तत्त	३/७८
छायाख्या महिषी	४/७९	तत्त्वं ज्योतिःस्वरूपं	२/१८
छिनत्ति बद्धमूलान्	५/३७	तत्प्रकाशेन सर्वत्र	२/६८
जगत्सर्गार्थमुद्युक्तः	७/२८	तत्र के सन्ति देवेश!	७/७१
जगत्सृष्टावादिभूतै	३/६७	तत्र गत्वा महाप्राज्ञ	१/२३
जगद्धिताय रक्षायै	४/२१	तत्राद्यं भगवद्रूपं हिमु	३/३४
जटी सुराऽसुरैर्वन्द्यः	५/२७	तत्राऽपि वासुदेवेऽस्ति	३/२१
जडसर्जनमुख्यत्वाद	७/१४	तत्रापि समता काचित्	३/७३
जन्मबीजक्षयकर्त्री	१/४९	तथा परात्परो देवो	३/१९
जपनीयमहोरात्रं ज्ञानं	८/२६	तथाऽपि सर्वतो भिन्न	२/२३
जयेश्वरस्य देवस्य	३/५६	तथा व्यूहेन सम्बद्धा	३/५०
जले विष्णुः स्थले	२/५७	तथैवाऽत्र परंब्रह्म जग	३/१४
जानुभ्यां सुतलं विद्धि	६/६८	तथैवाश्रित्य तत् सर्वं	२/२३
जायते युगसन्धौ स	४/३७	तदन्यस्मिन् परे पद्मं	३/१००
जायन्ते विभवास्तस्मा	२/२७	तदभावे तदभाव इति	३/१६
जीवाभिमानरूपोऽहम्	३/७८	तदा तं तत्त्वतो ज्ञात्वा	२/४९
ज्ञातव्यश्च कथं ब्रह्म	३/४	तदानन्दाश्च तत्सुखा	२/७५
ज्ञातव्यमधिदैवञ्च मूर्ति	७/५४	तदा मिथुनधर्मेण प्रजा	७/४९
ज्ञात्वेतरं परित्यज्य	८/२७	तदा शान्तरजो ब्रह्मा	७/३०
ज्ञात्वैवं नश्वरं सर्वं शुद्ध	८/१३	तदा स क्षोभयामास	६/९
ज्ञानं मोक्षप्रदं दिव्यं	७/२	तदाऽसौ सर्वलोकेश	२/५४
ज्ञानं साधय देवर्षे!	१/२६	तदुत्पाटनसिद्ध्यर्थम	४/१०१
ज्ञानमेव परं तत्त्वं ज्ञानं	८/२३	तदैकात्म्यं कथं तस्य	३/४
ज्ञानमेव परो देवो नित्यं	८/२४	तद् भजेतानुवृत्तिं च	३/७२
ज्ञानरूपस्त्वमेवाऽसि	२/२	तद्भिन्ना प्राकृतिकी	७/७
ज्ञानरूपाद्धलिनस्त्वं	१/५८	तद्वत् प्रकाशरूपत्वात्	२/३५
ज्ञानवैराग्यसद्धर्ममार्ग	५/३	तद्विशेषस्वरूपं तु विज्ञे	७/६१
ज्ञानेन्द्रियाणि भेदेन	६/५१	तन्त्रञ्च वासुदेवाख्यं	१/५८
ज्ञेयं यत् तत् प्रवक्ष्यामि	२/११	तन्नैच्छन् मोक्षधर्माणो	७/३३
ज्योतिषा दिव्यतां यातं	१/३०	तपसा ह्येधमानेन प्राप्त	७/२५

ज्ञानरात्रम्

तपोनाम्नि तथा षष्ठे ७/७५
तपोयागजपध्यानस्व ४/६०
तप्तकाञ्चनवर्णाभः ४/८०
तप्तकाञ्चनवर्णाभा ३/४०
तलातले महातले ७/७७
तल्लयो नित्यरूपेण ८/४
तव जिज्ञासया चैवं २/१४
तस्माच्चिदचितां तेन ३/१४
तस्माच्चैव विकुर्वाणाद् ६/५६
तस्माज्जाता ततो देवी ३/५६
तस्मात् त्रिगुणवैषम्याद् ६/१७
तस्मात् पृच्छ यदाख्ये ८/३५
तस्मादपि प्रजासृष्टिर्न ७/४०
तस्मादात्यन्तिकं श्रेयो १/१७
तस्मादेकायनं नाम १/५६
.... तस्माद् ६/५७
तस्य यावद् दिनं तावत् ८/७
तस्यानुवृत्तिलेशेन सर्वे ३/६९
तां मूर्तिं स्थापयित्वा २/५१
तादात्म्यं प्राप्य तं २/५३
तादृशां कर्मिणां बन्धः ८/३०
तान् जगाद स्वभूः ७/३३
तान् सर्वान् संशयान् २/६३
तामसं कालरूपेण ६/२०
तामसः काल इत्युक्तो ६/३३
तामसाच्च विकुर्वाणाद् ६/५३
तावत्पर्यन्त आख्यातः ७/१३
तीर्थानां सेवनाद्वाऽपि १/४५
तुर्यं ज्ञेयं परं तत्र लीनं ४/५
तुर्यसुषुप्त्यवस्थाख्यं ४/४
तुषारधूलिधवला खड् ३/६६
तुहिनाचलसङ्काशो ४/३१
तृतीयं पर्व इत्युक्तं सर्गे ६/५८
तृतीये नाकपृष्ठे तु स्वरा ७/७३
तेजसा सलिलं स्वेन ७/१८
ते यास्यन्ति पदं दिव्यं १/५४
तेषां रूपं महिषीं च ४/१३
तेषां स्थानानि देव्यश्च ४/२३
तैजसात् खल्वहङ्कार ६/४८
त्यक्त्वाऽऽत्मन्येव ८/१२
त्यक्त्वा प्राकृतिकान् २/७८
त्यक्त्वा भूतात्मसंबुद्धि ७/६९
त्रयमेवं हि देवानां ३/९५
त्रिगुणाः दुःखरूपाश्च ८/२०
त्रितयं तद्धि विज्ञेयं ३/९०
त्रिविक्रमो जनाराध्य ५/१७
त्रिविधं कथितं ब्रह्म ३/१
त्रिविधोऽसावहङ्कारो ७/६५
त्रैगुण्याः विषयाः सर्वे ८/१८
त्रैगुण्यात् प्राकृतिक ७/८
त्रैलोक्यं नाशमायाति ८/८
त्रैलोक्यपूरको विप्र! ५/१८
त्रैविध्यं ब्रह्मणः साधो! ३/६
त्वं हि शास्त्रार्थद्रष्टा नः ७/४
त्वमेवागमवेत्ताऽसि २/२
त्वमेवासि हरेर्भक्तः ८/
त्वादृशाय सुपात्राय ८/३४
दक्षिणवामहस्ताभ्यां ३/८७
दक्षिणादिक्रमेणाऽथ ३/६१
दक्षिणेन तु शास्त्रार्थमा ५/४४
दक्षिणे मुख्यहस्तेऽब्जं ३/८६
दत्तात्रेयश्च भगवान् ५/५
ददर्श दैवतं युग्मं १/५
ददर्श नारदो दिव्यं १/३४
ददात्युपासकेभ्यः स ३/५९
दधानः सुभ्रुवः शान्तो ३/५४
दधानश्च फलं दाता ३/६२
दर्भविष्टरयुक्पाणिः ५/३१
दर्भाजिनं ततश्छत्रं ४/५२
दर्भाजिनं मेखलाञ्च ४/६९
दर्वीकमण्डलुर्हैमश्चाभयं ४/५१
दशाननस्य संहर्ता सतो ५/३९
दिगादिदेवतास्तेषां ७/६८
दुर्लभं तत् पृथिव्यां तु २/११
दुर्विज्ञेयं तदेवाऽपि २/३९
दुर्विज्ञेयं सुविज्ञेयं कृत्वा १/६२
देवताः किन्नरा नागा ७/५०
देवदैत्यादिसम्भेदं नासी ३/२७

ज्ञानरात्रम्

देवर्षे! संशया: छिन्ना ७/७०
देवर्षे! सम्प्रसन्नोऽस्मि २/९
देवानां दुर्लभं ज्ञानं २/१२
देवानामपि यो देव: २/४३
देवी नारायणी यस्य ५/३०
देवो वामनदेहस्तु ४/१८
.... देवोऽसौ ४/११
देव्यो लोका दशाश्चैव ३/२५
दृश्यं चराचरत्वं य: २/५६
दृष्ट्वा पापीयसीं योनिं ७/२९
द्यावापृथिव्योरन्तस्थो ४/४९
द्योतयन्तो दिशा: ४/२८
द्रवत्कनकवर्णाभ: ४/७५
द्रवत्कनकवर्णाभ ५/४६
द्वयमैश्वर्यवीर्याख्य ७/६५
द्वादशभुजसंयुक्त: ४/१०१
द्वादशानां च मूर्तीनां ३/१०८
द्वितीयं पर्व विख्यातं ६/४०
द्विपरार्धावसाने तु ८/९
द्विभुजश्च गुणग्राही ५/७
द्विहस्तमेकवक्त्रं तद् २/१७
द्विहस्तमेकवक्त्रञ्च २/३०
धत्ते दामोदर: सव्ये ३/१०५
धरणीरक्षको भर्ता ४/७५
धराधरे चित्रकूटे रक्ष: ५/४०
धर्ता मादेवीसंयुक्त: ४/९८
धर्मं ज्ञानञ्च वैराग्यं २/१४
धर्मात्मा भगवान् ४/६५
धर्मो ज्ञानञ्च वैराग्यमैश्च ६/२१
.... धाताऽम्बुरोहद ७/२०
धाता सर्गार्थमुद्युक्तो ७/३१
धियं स्वां महिषीञ्चैव ४/२६
धीर्वृत्तिरुशनोमा ७/३८
ध्रियमाणो गदां गुर्वीं ४/९३
ध्रुवाख्यो धारयिताऽसौ ४/२८
नदन्नादमनाख्येय: ४/७८
न दिवा नैव रात्रिश्च २/६९
नभस: स्पर्शतन्मात्रं ६/५४
नम: परमहंसाय नम: १/९
नमस्ते ज्ञानस्वरूपाय ७/१
नमो हिरण्यगर्भादिदेव ६/२
नमो हिरण्यगर्भादिस्त्रष्टे १/८
नरनारायणाख्यस्य १/२
नरनारीमयो देव: कीर्ति ४/८९
नरसम्भवया सार्धमास्ते ५/२७
नराकृति परंब्रह्म २/२१
नराख्यो भगवान् यस्तु ५/२४
नरादीनां पिता धीमान् ४/६६
नरो नारायणश्चैव हरि: ४/१९
न वर्णा: न वाहङ्कार २/७०
न वर्धन्ते प्रजा नूनं दैव ७/४७
नष्टार्कचन्द्रकिरणं ब्रह्मा ३/२७
नागै: सह वसत्यत्र ७/७९
नानामन्त्रमयीं विद्यां ४/३६
नानामुद्रास्त्रवृन्देन भुज ५/१९
नानास्त्ररूपभूतात्मा ४/९६
नान्तं लेभे श्रमं प्राप्त: ७/२३
नाभिरन्ध्रात्मके क्षेत्रे ७/१६
नामरूपादिरहितमव्यक्त ३/२६
नामानि शक्तियुक्तानि ७/३७
नामानि द्वादशानां तु ३/८४
नाम्ना श्वेतं सुविख्यातं १/३०
नारद: कथयन् सर्वं १/४२
नारद! तस्य देवस्य २/४६
नारद! विभवाख्यानां ५/१
नारद! व्यूहविस्तारस्त ३/१०९
नारद! सम्प्रवक्ष्यामि ३/२४
नारदो धर्मम्मर्मज्ञ २/१
नारसिंहीं मही(हि?)षीञ्च ४/८१
नारायणाख्यो भगवान् ३/८८
नारायणावतारोऽसौ ४/४०
नारायणो य: क्षीराब्धौ ७/१२
नावच्छिन्नं हि देशेन २/३३
नास्ति ते किञ्चिदज्ञातं ७/७२
नास्ति भेदस्तयोर्धीमन् ३/३२
नास्ति श्रेष्ठमित: ८/१६
नास्ति सर्गेऽत्र मालि ७/६
नाऽस्य पारं स्वयं ५/५३

ज्ञानरात्रम्

नित्यं सन्निहितो देव:	४/६७	पद्मकोशं तदाविश्य	७/२६
नित्यत्वं खलु प्राग्	३/२	पद्मकोशो महान् जात:	७/१७
नित्यमप्राकृतं दिव्यं	२/६६	पद्मगर्भनिभा कान्ता	३/४८
नित्यमेवास्ति सर्वत्र	३/३२	पद्मगर्भनिभा कान्ता	३/५७
नित्यसन्निहिता देवी	४/३३	पद्मगर्भोपमाकारा	३/४०
नित्यानामपि तत्त्वानां	३/७	पद्मजाया अधिष्ठानात्	६/१४
नित्योदितात् संबभूव	३/३०	पद्मनाभात्मना शक्ति	४/२३
नित्यो निमित्तीभूतश्च	८/१	पद्मनाभादयस्तत्र त्रिंश	४/१३
निरीक्षमाणा वदनं प्रद्यु	३/५८	पद्मनाभो ध्रुवोऽनन्त:	४/१४
निर्गुणं निर्विकारञ्च	२/२०	पद्महस्ता सौम्यनेत्रा	३/४१
निर्गुणो वासुदेवश्च	३/८२	पद्माद्यं चातुरात्मीया्	४/५०
निर्दोषं निरधिष्ठेयं	२/१५	पद्मासनोपविष्टोऽसौ	५/२
निर्मला शक्तयस्तेषां	६/३२	पद्मिनीवरद: श्याम:	५/४८
निशाचरा वसन्त्यत्र	७/७७	परं ज्योतिरुपसन्ना:	२/७४
निशानिमित्तमालम्ब्य	८/५	परं त्वं खलु योग्यो	१/६१
निषण्णो भोगिशय्यायां	४/७३	परञ्च कारणं प्रोक्तं	३/३
निस्तरङ्गं परं ब्रह्म	७/५७	परतत्त्वान्वयेनैष:	४/६२
नीलनीरजवर्णा च	३/५८	परन्तु	४/३
नीलनीरदवर्णाभ:	४/९१	परन्तु परदृष्ट्या तु	३/८२
नीलशाद्वलसंच्छन्ने	१/२	परमव्योम इत्युक्तं	२/६२
नूनमुत्पाटयत्याशु	५/४७	परमात्मन्येव यो रक्तो	८/१२
नृवराहो दयामूर्ति:	४/७७	परमात्मानमेवैकं	२/७०
नृहरिस्तु बृहन्मूर्तो	४/७९	परमेश्वरमनाख्यातं	२/२०
नैकलौ देवदेहौ तु	३/१३	परमेष्ठी पुमान् विश्वो	६/३०
नैतद् रहस्यं वक्ष्यामि	१/१९	परव्यूहविभागेन	४/१
नैमित्तिक: स: विज्ञे	८/५	परशुधारको राम:	५/३६
नैमित्तिकाख्ये लये	४/७२	परस्य ब्रह्मणो ज्ञातं	४/१
नैव वृद्धिं गता तावत्	७/४६	परस्य ब्रह्मणो रूपे	२/३१
नैवेते प्राकृता देवा:	३/८०	परागतिञ्च सर्वेषामच्यु	१/३६
नोत्फुल्लं दृश्यते	१/१२	परात्परं परब्रह्म सर्वका	३/११
नौबन्धगिरौ ब्रह्मन्!	५/१३	परात्पर: परे धाम्नि	१/५२
नौरूपां विततां क्षौर्णी	५/१२	परात्पर: प्रभु: योऽसौ	२/४१
न्यग्रोधविटपाकारो	४/१००	परात्परस्य संस्थानात्	३/१६
न्यग्रोधशयनो देवो	५/८	परात्परस्वरूपं तु द्विह	२/३७
न्यग्रोधशायी भगवान्	४/१८	परात्परस्वरूपं यद्	३/६९
पञ्चनामभिराख्यात:	६/३१	परात्मनि मनोवृत्तिं	१/५०
पञ्चरात्रादिकान् शास्त्र	२/७७	परानुवृत्तितो ब्रह्मन्	३/३३
पञ्चानामिन्द्रियाणां तु	७/६७	परा वाक् नाभिचक्र	५/४२
पद्मं मुख्यकरे वामे	३/९४	परित्यजति लोकोऽयं	८/२८

ज्ञानरात्रम्

परिपक्वकषायाश्च	१/२१
परिवर्तनशीलश्च ततो	८/१४
परे ब्रह्मणि निष्णाताद्	२/७८
पर्णवृद्धिर्यथा वृक्षे	८/४
पशव: पक्षिणश्चैव	७/५१
पश्चिमे कञ्चचक्रे तु	३/८९
पश्चिमे दक्षिणे ज्ञेयं	३/१०६
पाञ्चरात्राभिधं ज्ञानमा	२/४
पाञ्चरात्रिकाज्ज्ञानाद्	८/३३
पातालशयनो देव:	५/४९
पात्रभेदेन भेदोऽयं न	३/१९
पादतले तु पातालं	६/६९
पादेनैकेन स्थित्वाऽसौ	५/३३
पारावारपरब्रह्म ततोऽन	२/४६
पारिजातहरो देवोऽनेक	४/९८
पाहि पाहीत्यभीक्ष्णं	७/३०
पितर: संवसन्त्यत्र पञ्च	७/७४
पिशाचोरगगन्धर्वयक्षमा	७/९
पीताम्बरधरं ब्रह्मन्!	३/३५
पीताम्बरधरो ब्रह्मन्	४/८२
पुण्यगन्धवहोपेतं	१/३१
पुन: योग्यमविज्ञाय	१/६१
पुनर्विचिन्तयन् ब्रह्मा	७/४१
पुरुषशक्तिमासाद्य	६/१३
पुरुषस्याननं ब्रह्म	६/६४
पुरुषोत्तमस्य देवस्य	२/७२
पुलहो नाभितो जात:	७/४४
पुष्पस्रुग् व्यजनं विप्र!	४/५३
पूजयामास सद्यैव	१/६
पूर्णं ब्रह्म वासुदेव:	३/२२
पूर्णं वाऽवतरत्यत्र	५/५५
पृथक्त्वेनेन्द्रियाण्याहु:	७/६८
पृथिव्यबनलानिलमूल	४/२४
पृथ्वी स्थिरा:(रा?)	२/४२
पृष्टं यद् यच्च नापृष्टं	२/८
प्रकाशनाच्च यन्तृत्वाद्	३/१०
प्रकाशयन्ननादित्वम्	४/८६
प्रकृतिपुंस आरभ्यानि	७/११
प्रकृतिपुरुषादीनां कार्य	२/२२
प्रजापतय एते हि सृष्टि	७/४५
प्रजाया: कारणं राजा	३/९
प्रणम्य सर्वभूतस्थं	६/३
प्रणष्टसत्त्वधर्मोऽहं न	७/२९
प्रणिपातपुरस्कारमब्र	१/१३
प्रथिष्ये व्याहरन् ब्रह्मा	७/३६
प्रद्युम्नादनिरुद्धश्च संब	३/५९
प्रद्युम्नो देवता तस्या	६/२२
प्रधानत्वात् जगत्यस्मि	२/३६
प्रबन्धप्रतिपन्नानां	४/९९
प्रबुद्धोत्पलविस्तीर्ण	३/४९
प्रबुद्धोत्पलविस्तीर्ण	३/६६
प्रभेव दिवसेशस्य	३/३९
प्रलयं यान्ति तत्त्वानि	८/१०
प्रलयकार्यकर्तास्मि	३/७९
प्रलयानिलसूर्याभो	४/४१
प्रवक्ष्ये प्रथमं ब्रह्म	२/१५
प्रवालाभवपु: धीमन्	५/२५
प्रष्टव्यमस्ति चेत्किञ्चि	२/६०
प्राकृतप्रलयो ज्ञेय:	८/११
प्राकृताकारवर्जं तद्	२/३३
प्राक्समुद्रापयाने च	४/४७
प्राण: प्रयतनाख्येन	६/२७
प्राणशक्तिस्तथा	७/६१
प्राणस्य हि क्रिया	६/४९
प्राणाद् वसिष्ठ: सञ्ज	७/४३
प्राणो पञ्चविधो ज्ञेय:	६/२५
प्रादुर्बभूव प्रद्युम्नस्त	३/५१
प्रादुर्भवति धर्मात्मन्!	२/४९
प्रादुर्भवति भक्तानां	४/३४
प्राप्तेऽप्यर्थस्य विज्ञाने	१/४४
प्राप्यते तद् ब्रूहि देव!	२/६
प्राप्यते नैव प्राप्यं तत्	२/७७
प्राप्य पुनर्नयन्त्यत्र येन	१/१८
प्राप्याचार्यं गुणैर्युक्तं	८/२७
प्रावृड्गिरिरिव श्याम	५/७
प्रावृण्निशासमुदितख	३/५२
प्राह नारद! धर्मज्ञ!	१/४१
प्रेरितेन हिनस्त्याशु	४/३९

ज्ञानरात्रम्

प्रोच्छ्रितं हि सुव(प?) ४/५०
प्रोद्वहंस्तु स्ववीर्येण ४/२६
फलपुष्पभरानम्रवृक्ष १/३१
फलैरुपचिते दिव्ये १/३
फुल्लरक्ताम्बुजा ४/४४
फुल्लरक्ताम्बुजा ४/८९
बटुकरूपधरः शान्तो ५/१६
बदरीकाश्रमे संस्था ५/३५
बदरीशं कथितं यत् १/४२
बद्धब्रह्माञ्जलिः शान्तो ५/२९
बलसंवलितं ज्ञानं मयि ३/४७
बुद्धिरष्टविधा जाता ६/२१
बुद्धीन्द्रियाण्यधिष्ठाय ६/५०
बुद्ध्यभिमानिरूपेण ३/८०
बृंहणत्वात् तु ब्रह्माख्यं ६/६०
बोधमारुतहृत्पूर्वस्थाने ५/४२
ब्रह्म परं हि विज्ञेयं यत् ७/५९
ब्रह्माण्डसर्जने युक्तो ७/१२
भक्तानां क्षुत्तृषादीनां ४/८४
भक्तानां रक्षकः सम्यग् ४/८१
भक्तानां सुखदा माया ३/६४
भक्तिश्रद्धापराणां स ४/३७
भगवत्प्राप्तिरूपं स ३/६२
भगवत्प्रेरणां प्राप्तैर ३/५९
भगवद्धर्मजिज्ञासापरैः १/३२
भगवद्ध्यानपूतेन ७/३१
भगवद्वासुदेवेन ३/९०
भगवन्! धर्ममर्मज्ञ! १/१४
भजनीयमिदं तत्त्वं ८/२५
भयविस्मयहृद् देवो ५/२२
भवति शिथिलः विप्र! ८/३०
भविनां भवनाशाय ४/६
भुवस्तु द्वितीयो लोको ७/७३
भुवि सिद्ध्यै प्रवृत्ताना १/४३
भूतं भव्यं भविष्यच्च ६/३५
भूभागेष्वथ रम्येषु ५/२८
भूर्भुवःस्वःशरीरः ४/५८
भूर्लोकः स्वीकृतः ६/६५
भूर्लोको मृत्युलोक ७/७२
भृगुर्वशिष्ठो दक्षश्च ७/४२
भोगक्षेत्रं तु लोको ८/१७
भोगमोक्षप्रदो देवः ४/२७
मगधामण्डले विप्र! ५/४
मणिप्रवालविस्तारे १/४
मत्स्यात्मा संवृतगात्र ५/११
मदविह्वलनेत्रोऽयं देवा ४/८८
मधुसूदनरूपेण प्रादु ४/४०
मधुसूदनसंज्ञस्य सन्नि ३/९४
मध्यदेशे तु गङ्गायाः ५/२३
मध्याह्नभास्कराकारो ४/९२
मनःसृष्टौ रता अज्ञाः ६/४६
मन उपरतं कुर्यात् २/५०
मन एव मनुष्याणां ६/४६
मनसश्चेन्द्रियाणाञ्च ६/४१
मनुष्यमुनिदेवानां ब्रह्म ५/५
मनुष्या ऋषयो जाता ७/५१
मनोजयस्तु मोक्षो वै ६/४७
मनोबुद्धिरहङ्कारः प्रकृतेः ८/१९
मनोभूतः स्थितो देवः ३/७९
मनोवाजिनमाक्रम्या ५/४७
मन्युर्मनुर्महान् सोमो ७/३७
ममैवेच्छया ब्रह्मन् १/६२
मरीचिरत्र्यङ्गिरसः ७/४२
महत्तत्त्वस्य विस्तारः ६/३९
महत्तत्त्वाद् विकुर्वाण ६/४०
महर्षिजनसम्मान्यो ५/४४
महातलं तु गुल्फाभ्यां ६/६८
महाविद्या महालक्ष्मी ६/१५
महिमानुवर्णितश्चान्यत् २/७९
महिमाऽस्त्यनन्तस्य २/३२
महिषी तस्य लक्ष्मीश्च ३/३८
मानसेऽनन्तशयने दिव्य ४/२५
मानुषेषु च मुग्धेषु ३/६४
मायातीतस्य देवस्य २/४८
मायिकाः करणाः २/४७
मायेति देवी विख्याता ६/२७
माऽरोदीस्त्वं सुरश्रेष्ठ! ७/३६
मार्गमे(मै?)कान्तिकं ३/४७

ज्ञानरात्रम्

माहात्म्यं श्रीहरेर्ज्ञात्वा	८/१५	यदाज्ञया तपति सूर्यो	२/४२
मया प्रवर्तितं	१/५०	यद्विदुरनिरुद्धाख्यम्	६/४५
मुख्यदक्षिणहस्तेन	३/३५	यस्तु तत्र पुमान्	७/४८
मुख्यहस्तद्वयं चास्य	३/५३	यस्येहावयवैर्लोकान्	६/६३
मुख्येन पाणियुग्मेन	३/४६	या काचिद् दृश्यते	३/६३
मुख्ये सव्यापसव्ये तु	३/८८	यामुनं तटमासाद्य	५/२३
मुदा परमयोपेत:	१/३८	याम्योत्तरे स्थित:	४/३०
मुनयो ब्रह्मनिष्णाता:	१/५५	युगानुसारिकान्तिश्च	४/३५
मुनिमुख्यै: समाकीर्णं	१/३३	येन व्यूहस्य सामर्थ्यं	३/२४
मुनीनामपि दुष्प्राप्यं	२/१२	येनेदं दृश्यते विश्वं	२/५६
मुसलं मुद्गरं भीमं	४/९७	ये संश्रयन्ति मां भक्त्या	१/५४
मूर्तचक्रगदाहस्तो	४/३६	योऽन्त: स्थितश्च भक्त	४/४८
मूर्तित्रयमिदं दिव्यं	३/८९	यो बोधभूमौ संरूढो	४/९९
मूर्तित्रितयमेते वै प्रद्यु	३/१०१	रक्तकौशेयवसनो मकर	३/५२
मूर्तिपत्नीयुत: पाति	४/६६	रक्तराजीवनयनो धनु:श	५/३९
मूर्तिमान् वर्णितस्तस्य	१/५२	रज: ऐश्वर्यवज्ज्ञेयं सक्रि	६/११
मूर्धदेशगता निद्रा तुष्टि	५/५२	रजस्तम:परो देव: सत्त्व	४/५६
मूर्ध्ना सत्याख्यलोको	६/६७	रम्येषुणा तृतीयस्तु तुर्यो	४/७
मूलभूतस्तु सर्वेषां	१/५७	रम्यैरलङ्कृता: सर्वे	३/७६
मृत्युलोकादधस्तात्	७/७६	रसतन्मात्रमुत्पन्नं जलं	६/५६
मेरोरुत्तरतस्तीरे निकटे	१/२०	रसैर्विमुक्त(क्तं?)	२/६५
मोक्षायनाय वै मार्गस्त	१/५६	रसो वै परमात्माख्य	८/२८
मोक्षैकनिरतानां तु	८/१६	रहस्यं वेद्यसर्वस्वं	१/६०
मोहपाशेन बद्धत्वात्	६/४७	रहस्यानां रहस्यञ्च	२/१३
मोहशास्त्रप्रभावेन लीनं	१/५१	राजते शाश्वतं द्वन्द्वं	३/४३
यच्च प्राक् कथिता	४/८	राजसा: सन्ति देवास्तु	७/७४
यच्चोदितं मया पूर्वं	१/५५	रामकृष्णादयश्चैवं	२/६०
यतन्ते श्रेयसे भूमौ	१/१५	राहुजित् कालनेमिघ्न:	४/१७
यत्कायमिति प्रख्यातं	७/४८	राहुजिदपि तत्रैव	४/९४
यत्किञ्चिद् दृश्यते	६/७१	राहुजिद् भगवान्	४/९१
यत्तत्सत्वगुणं शान्तं	६/१८	रूपमात्रं समुत्पन्नं	६/५५
यत्र क्रमेण दृश्यन्ते	८/३	रूपी प्रतिष्ठितो नेत्रे	६/५५
यत्र ज्ञानबलादीनां	३/३७	लक्षणं तत्स्वरूपञ्च	४/२
यत्र नारायणो देव:	१/५१	लक्ष्मीतन्त्रश्च स देवी	४/८६
यत्र पात्रस्य नैर्मल्यं	४/१२	लक्ष्मीनारायणाख्यातो	४/८७
यत्रैकान्तिनो मुक्ता	१/२१	लक्ष्मीनारायणाख्येन	३/४३
यत्सङ्कल्पविकल्पा	६/४४	लक्ष्म्या संवाह्यमानो	४/७४
यथार्क: स्वप्रकाशेना	४/११	लक्ष्यभूतं यद् आसृष्टे	३/२९
यथा सर्वेषु गात्रेषु	२/३६	लम्बकूर्चो जटादण्ड	४/४३

ज्ञानरात्रम्

लय आत्यन्तिकः ८/१३
लयो नैमित्तिकः ८/९
ललाटतिलकैश्चित्रैः ३/७५
लवणोदधिभूभागे ४/७६
लाञ्छनेन स विज्ञेयः ४/६
लीलाकटाक्षबाणेन ४/९०
लोकनाथस्तु शान्तात्मा ४/१७
लोकनाथस्तु शान्तात्मा ५/२
लोकस्रष्टा तपश्चक्रे ७/२४
लोकानुग्रहधर्मो मे २/१०
लोके विस्तारय ज्ञात्वा १/६२
लोकेशास्त्राष्टकं चैव ४/५१
लोकोऽयं क्षोभरहितो २/७३
वक्ष्ये चित्सृष्टिरूपं ७/१४
वटमूल(लं?) समा ५/१०
वडवावक्त्राख्यविभवः ४/६२
वदनं प्रसादसदनं ते १/११
वनमालाधराः सर्वे ३/७४
वनेषु दिक्षु सर्वत्र सर्वं २/५७
वन्दमानाः परं देवं १/२३
वरदाभयहस्तौ द्वा २/७३
वर्णनादीश्वरस्यात्र ७/५
वर्णितः खलु धर्म १/५९
वर्षाणां तु सहस्रा ६/६०
वहन् वै वामहस्ते ५/४३
वाक्पाणिपादरूपा ६/५२
वागीश्वरी क्रिया ६/३१
वागीश्वरो हयग्रीवः ४/६८
वागीश्वर्याश्च भर्ता ४/७१
वामनो विभवावेशो ५/१४
वामहस्तद्वये धता ४/३२
वामहस्तेष्वमी ज्ञेया ५/२२
वामादौ शङ्खचक्रौ ३/८७
वामे गदां पश्चिमेऽन्य ३/१०४
वामे तु पश्चिमे ३/९९
वामेन च गदां गुर्वी ३/३७
वामेन संगृहीतश्च ३/३६
वामेऽपरस्मिन् शार्ङ्गं ३/५४
वामे पश्चिमगे चक्रं ३/८५
वायुभक्षो व्रतव्रात ५/३३
वायुर्निःश्वासतो ६/७०
वायुवत् सूक्ष्मरूपा ६/५२
वाराहो नरसिंहश्च ४/१६
वासनावासितानां ४/६१
वासुदेवं ददर्शासौ १/३८
वासुदेवः प्रभुः शुद्धो ८/२१
वासुदेवः स व्यूहस्य ३/७७
वासुदेवप्रवेशेन ७/६
वासुदेवमिदं सर्वं ३/११
वासुदेवमेवैकं ध्या १/२२
वासुदेवस्त्वमेवासि २/६३
वासुदेवात् ततो व्यूहा ३/४४
वासुदेवात्मकं ज्ञानं ८/२४
वासुदेवात्मकं प्राहुः २/५८
वासुदेवात्मके शुद्धे ७/५
वासुदेवादयो यस्माद् २/२६
वासुदेवादिव्यूहैश्च २/४५
वासुदेवाद्यदेवानां ३/८५
वासुदेवानुकम्पाभिव ५/१
वासुदेवाह्वयं दिव्यं ३/२८
वासुदेवेच्छया तुभ्यं ८/३२
वासुदेवेच्छया ब्रह्मन्! ६/६
वासुदेवेच्छया ब्रह्मन् ८/१०
वासुदेवेच्छया विप्र! ६/७५
वासुदेवेच्छया श्रेष्ठ! २/१३
विकारे वसुधाधारे ४/७२
विकुर्वन्ति इमे देहा ८/२
विग्रहस्तस्य देवस्य १/३९
विज्ञानं कथय मह्यं २/३
विज्ञानरश्मिभिर्दीप्तो ४/९५
विज्ञाय निजमाहात्म्यं ७/२७
विज्ञेयो ह्यधिभूताख्यः ७/५५
विद्यया सार्धमासीनो ४/४५
विद्याधिदेवः कपिलो ४/१४
विद्याधिदेव(वो?) भगवान् ४/४३
विद्यार्थिनां सुखं दाता ४/४५
विधाता तं तु संरुद्ध्या ७/४०
विधिरुत्पादयामास दश ७/४१

ज्ञानरात्रम्

विन्यासमायुधानां तु	३/९२	व्यूहाख्यं विभवाख्यञ्च	८/२५
विपरीतानि चत्वारि	६/२२	व्यूहात्मवासुदेवेन	६/१८
विभक्ता वेदशास्त्राणां	५/४१	व्यूहादौ कार्यभावाख्या	३/१०
विभवा वर्णिता	४/२०	व्यूहादौ वैभवादौ च	३/१५
विभवे च ततो न्यूनं	३/२२	व्यूहे च विभवे पूर्णं	३/२३
विभोस्त्रिविक्रमाख्य	३/९८	व्यूहे सर्वाधिकं तेज:	३/२१
विलापयति लये सर्व	६/१२	व्रतैस्तीर्थैः प्रयत्नेन	१/१५
विलोक्य गिरिशृङ्गानि	१/२९	शक्ति: परशुशैलेन्द्रौ	५/२०
विवेकस्तत्र विज्ञेयो	२/५८	शक्तिमाधारसञ्ज्ञाञ्च	४/२९
विशाखयूप एवैष	४/९	शक्तिभि: विविधाभि:	२/४४
विशालाक्षश्चतुर्बाहुर्मृ	३/६०	शक्तिरूपा इमे प्राणा:	६/२९
विश्वकामापतिर्देवो	४/९३	शक्तिर्नारायणी दिव्या	३/३९
विश्वेश्वरो विश्वरूप:	४/४८	शक्तिव्यूहमसङ्ख्यं	७/६०
विष्वक्सेनादिभिर्नित्यं	१/३५	शक्त्या ईशो ददात्यत्र	४/३७
विहस्य वासुदेवोऽसौ	१/४३	शक्त्यात्माऽप्यथ सञ्चि	४/३४
विहाय वासुदेवाद्यं	४/९	शङ्खचक्रगदाकञ्जला	३/८४
वीज्यमानस्तथा प्रीत्या	४/७३	शङ्खचक्रगदापद्मधारकं	३/३१
वेगात् तामसी विख्या	६/२५	शङ्खचक्रगदापद्मैरङ्किता:	१/२२
वेदविद् भगवान्	४/२०	शङ्खचक्रधरं विष्णुमान	१/३७
वेदविद् विद्वदानन्द:	५/४१	शङ्खचक्रधरश्चैव बाण	४/४१
वेदवेदान्ततत्त्वज्ञं वेदै	१/३६	शङ्खतोमरशार्ङ्गं च पाश	५/२१
वेदा: पादेषु दन्तेषु	४/५९	शब्दकोशं गदां भीमां	३/१०३
वेदानां सर्वशास्त्राणां	१/४४	शब्दमात्रमभूत्तस्मान्न	६/५३
वेदिकायास्तटे चैव	४/५५	शरचापकर व्यग्र: खड्	५/४६
वैकारिकादहङ्कारान्मन	६/४४	शरीरपातनेनाऽपि नैतत्	१/४६
वैभवीयस्य यूपस्य पति	४/१०	शरीरे आत्मबुद्धिर्या	८/११
वैराजपुरुष: सृष्ट: प्रथमो	७/१५	शान्तघोरविमूढात्मा	६/४३
वैराजपुरुषे देहे ख्याता:	७/७१	शान्तत्वं निष्कलत्वञ्च	३/७०
वैराजस्यायुष: कालो	८/६	शान्तावस्थां गताऽव्य	६/९
वैश्य ऊर्वोर्वासुदेवात्	६/६५	शारदेन्दु(न्दी ?)वरश्य	६/४५
वैषयं वासनाजालं	५/४८	शुद्धज्ञानानुविद्धोऽयं	४/८३
व्यक्तीभावं गतास्तत्र	६/१४	शुद्धसृष्टिर्मया ख्याता	५/५५
व्यचरन् तीर्थक्षेत्रेषु	१/१	शुद्धसृष्टिस्वरूपेण वेद्यं	७/७
व्यस्ता येन स विद्याया:	५/४३	शुद्धसृष्टौ शुद्धसत्त्वम्	६/१६
व्यानोदानसमानाख्या	६/२६	शुद्धा शुद्धेतरा सृष्टिरा	७/५२
व्यापिने वेदवेद्याय नम	१/८	शुद्धेतरत्वेन विज्ञेया	७/१०
व्यूहविभवरूपेण स्थितं	२/२५	शुद्धेतरविभागेन सत्त्व	६/१६
व्यूहस्था वासुदेवाद्या	३/६८	शुद्धेतराऽपि तत्रैवं	७/५२
व्यूहस्य स्थानमाख्या	३/२५	शुद्धे शुद्धेतरे सर्गे	७/३

ज्ञानरात्रम्

शेषार्णवशयो देवः	६/६२
शोभिताः कौस्तुभे	३/७४
श्रिया चरणया जुष्टं	१/२४
श्रीधरस्य गदा वामे	३/९९
श्रीपतिर्दिव्यदेहोऽथ	४/१६
श्रीवत्साङ्कं प्रसन्नाभ	१/२५
श्रीश्च वागीश्वरी कान्तिः	३/१०७
श्रुतीनां मानसानाञ्चाप्या	५/६
श्रुतीर्ऋगाद्या वक्त्रेभ्यः	४/४४
श्रुत्वा पवित्रशास्त्राणि	८/१५
श्रुत्वा सर्वेश्वरः प्राह	१/१९
श्रुत्वैतद् वासुदेवस्य	२/६१
श्रेयसे सर्वलोकानां	२/३८
श्रोणीतटनिविष्टेन	४/९२
श्रोणीतटार्पितकरः	४/८३
श्रोतारमुपसङ्गम्य	६/७५
श्रोत्रत्वग्रसनाघ्राण	६/५१
श्वेतद्वीपे कुरुक्षेत्रे	४/५४
श्वेतद्वीपे महाधाम्नि	१/२०
श्वेतमाल्याम्बरधरा	३/४२
षट्सु दक्षिणहस्तेषु	४/९७
षडु(डू?)र्मिवासना	२/७०
षडूर्मिरहितं तत्र गच्छ	२/६९
षाड्गुण्यविग्रहं सूक्ष्मं	२/१६
संक्षेपेण मया ब्रह्मन्!	५/५३
संशयाविष्टचित्तानां जना	३/६
संशयोऽथ विपर्यासो	६/२३
संसाराङ्कुरपद्मेऽस्मिन्	७/१८
संसारार्णवमग्नानामात्मा	४/८४
संसारार्णवमग्ना ये	१/१४
संस्तूयते यो निगमैः	२/४५
संस्थितः शङ्खचक्राढ्यो	४/७६
संस्थितास्तु भुजेष्वस्याङ्के	४/५४
संहर्ता स्वप्रपन्नानामविद्या	४/६१
सङ्कर्षणप्रधानोऽसौ	६/४२
सङ्कर्षणश्च प्रद्युम्नो	३/७७
सङ्कर्षणादिभिर्युक्तं	१/२४
सङ्कर्षणाद्यदेवानां	३/९१
सङ्कर्षणाधिष्ठितः कालः	६/३७
सङ्कर्षणानिरुद्धादिव्यूह	१/३७
सङ्कर्षणोऽभिनत् सद्यो	६/६१
सङ्ख्यासमन्वितो	४/४६
सञ्चराद् विपरीतस्तु	८/१
सत्त्वं ज्ञानात्मकं तत्र	६/११
सत्त्वं रजस्तमो विप्र!	६/१०
सत्त्वादित्रिगुणैर्युक्तं	८/१८
सत्त्वादित्रितयं ब्रह्मन्	७/६३
सत्याख्याऽऽलिङ्गिता	४/१०२
सदसदात्मकं सर्वं	६/५
सदा मन्मानसः शुद्धः	१/१२
सदैकात्मस्वरूपाय	६/१
सद्ब्रह्मवासुदेवाख्यप	१/५७
सनकं च सनन्दञ्च	७/३२
सनत्कुमारञ्च मुनीन्	७/३२
सन्तिष्ठते स भगवान्	५/११
सन्तोषय जिज्ञासां	७/२
सप्तमे ब्रह्मलोके तु	७/७५
समं प्रधानतत्त्वेन त्वचा	६/१९
समपादस्य लोके	२/७२
समष्ट्याख्योऽनिरुद्धस्तु	६/२६
समानः प्रेरकत्वेऽपि	३/२०
समायातो द्रष्टुकामो	१/३
समाश्वसिहि मां देव!	२/३१
समासाद्य विपाशां च	५/४९
सम्प्रार्थ्य हलिनं सर्वं	२/१
सम्यग् वाक्पतिना	४/३८
स यदा देवदेवोऽसौ	२/४८
सरोरुहया संयुक्तः	५/८
सर्गः शुद्धेतरः ख्यातो	६/७४
सर्गात्मके चरित्रे	७/२
सर्वं तस्मात् समुत्पन्नं	६/७२
सर्वं त्वामभिधास्यामि	८/३५
सर्वं ब्रह्ममयं तत्र	२/७५
सर्वगं स्यात् कथं	२/२९
सर्वगन्धं सर्वरसं	२/१९
सर्वज्ञः सर्वदर्शी त्वं	१/१३
सर्वतः पाणिपादादि	२/१८
सर्वतः पाणिपादादि	२/३०

ज्ञानरात्रम्

सर्वत: पाणिपादादि	२/३४
सर्वत्र व्यापनाच्चैवं	३/१७
सर्वलक्षणसम्पन्ना	३/४२
सर्वलोकहितार्थाय	८/३४
सर्वशक्तिमयोऽनन्त:	५/५०
सर्वाकारं निराकारं	२/१७
सर्वाकारं निराकारं	२/२८
सर्वावयवसम्पन्ना	३/४१
सर्वावस्थागता देवी	३/३८
सर्वाश्रमोपकरणैर्यु	४/७१
सर्वेषां कारणत्वेन	३/२०
सर्वेषां ब्रह्मरूपत्वम्	३/१५
सवनानि तथा यामा	६/३८
सविशेषमथो वक्ष्ये	७/५६
सव्यापसव्यहस्ताभ्यां	३/९३
सव्यापसव्यहस्ताभ्यां	३/१०३
सव्ये तु पश्चिमे पद्मं	३/९७
ससर्ज प्रथमं पापं	७/२८
सहस्रयुगपर्यन्तं दिनं	८/६
सहस्रवदनो वाऽपि	५/५४
सहस्रशीर्ष: सहस्राक्ष:	६/६३
सहस्रशीर्षकं देवं	२/१९
सहस्रांशुसहस्राभ	४/२५
सहस्रानलगर्भश्च हेम	७/१७
सहस्रार्कप्रतीकाश:	७/१६
सहस्रेणाश्वमेधानां	१/४६
सहानिरुद्धदेवेन	३/१०७
साक्षाच्चतुर्मुखाज्जाता	७/८०
साक्षात्काराल्लयं याति	८/२२
साक्षात् प्रादुर्भ(र्भा?)	४/२२
साक्षादनन्तरूपेण	७/७८
साक्षाद्वा सन्निधानेन	२/३९
सागरे ऊर्मयो यद्वद्	३/५०
सात्त्विकं बुद्धिरित्युक्तं	६/२०
सात्त्विकं राजसञ्चैव	६/१९
सात्त्विकाऽपि रजो	६/२४
सात्वतं वैष्णवं ज्ञानं	१/४८
सादृश्यं षड्गुणत्वञ्च	३/७०
साधु पृष्टं त्वया विप्र!	३/५
सामर्थ्यं यादृशं स्वस्मि	३/१८
सालग्रामे गवां स्थाने	५/३५
साहङ्कारेन्द्रियप्राणभूत	७/१५
सिताक्षमालहस्तोऽसौ	४/६७
सितोष्णीषललाट: स	५/४५
सिद्धिमोक्षप्रदं शुद्धं	३/२९
सिद्ध्यर्थं यत्नशीलाना	८/३१
सिन्दूरशिखराकार	३/४५
सीरं तच्चक्रहस्तेऽस्य	३/४६
सुखदु:खगुणोपेतं	८/१७
सुदुष्करं तपस्तप्त्वा	१/४५
सुधाकलशधृग् देवो	४/८५
सुषुप्त्याख्ये परे(दे?)	४/५
सूकर: यज्ञपुरुष:	४/५८
सूकरक्षेत्रमादाय स्थि	४/१०२
सूक्ष्मत्वान्नेक्ष्यते सद्यो	८/३
सूचितो धर्मशास्त्राणां	१/६०
सृष्टिं चिदचितां वक्ष्ये	६/४
सृष्टिं स्थितिञ्च देव्यादि	४/३
सृष्टि: चिदन्वयात्	७/९
सृष्टिसर्गं विदित्वैतत्	७/१
सृष्टिसर्गादिदं ज्ञात्वा	८/२२
सृष्टिस्थानि हि तत्त्व	७/५३
सृष्टौ यत् त्रिगुणं पर्व	६/१५
सृष्ट्यादिकार्यकर्तृत्वात्	३/८१
सेवितश्च भगै:	२/४१
सौम्यमाद्यं वासुदेवं	२/१६
सौम्यवक्त्रश्चतुर्बाहु:	४/६५
स्तम्भभूतस्तु स ब्रह्मन्!	४/२९
स्तुत्वा नारायणं स्तोत्रै:	१/१०
